प्रशस्यकाः॥ सर्वशाकादृष्टिहरावर्जित्वातंडुलियकं॥ तथैवपुष्पंचतथाचकासमर्दकं॥ इतिसर्वशाकवर्गः॥
॥ कूष्माडकलिंगाकर्चिभेभंतुतुंडपटोलंचत्रपूषकंच॥ कुंडीरककोटकंकारवल्लंकोशातकीवल्लीफला
निचैव॥ वार्ताकमाघीचपटोलहंतिकरहाटकंचप्रवदंतिधीराः॥ एतेस्तुशाकैस्तुरसंबार्यमुक्तमन्योन्यवि
ज्ञातफलानिसम्यक्॥ कूष्माडहिविधंज्ञेयंबालंमध्यमंतथा॥ बालंत्वविकृतंघ्नंमध्यमंस्यात्त्रिदोष
जित्॥ शोषंवातकफौहंतिरक्तपित्तनिबर्हणं॥ कूष्माडगुणाः॥ कलिंगकफकृत्तद्वत्कारणंपित्तनाशनं॥
इतिकलिंगगुणाः॥ कारवेल्लंचमंतघ्नंकफघ्नंपित्तकारकं॥ उल्लंरुचिकरंप्रोक्तंरक्तदोषनिवारणं॥ इति
कारवेल्लं॥ चिर्भटंत्रपुसंचैवत्रिदोषघ्नंप्रशस्यते॥ तत्रापक्वंवातकफलकृत्॥ पक्वंकंचिद्विशिष्यते॥ ॥चिर्भट
त्रपुषगुणाः॥ ॥ तुंडिरमग्निरुचिकृत्पित्तघ्नंवातनिवारणं॥ कर्कोटकंत्रिदोषघ्नंरुचिकृन्मधुरंतथा॥ इतिक
र्कोटकं॥ कोशातकीफलंस्वादुमधुरंवातपित्तजित्॥ विपाकेचकफंहंतिज्वरेशस्तंप्रशस्यते॥ तुंडिपटोल
गुणाः॥ ॥ पटोलपत्रंविनिहंतिपित्तंनालंकफघ्नंप्रवदंतिधीराः॥ फलंचतस्यास्तुत्रिदोषशांतिंकरोति
नूनंज्वरिणांहितंस्यात्॥ वल्लीफलशाकगुणाः॥ ॥निम्बाकरंप्रातिकरंगुरुवातूसवातलंकासवि २२

कारहारि॥ श्वेतंसुवीर्यंचतथाचकल्पंश्वेतंविदार्यंबलगदोषहेतु॥ रक्तंकमेवंहृदयाभिरामंशाकेषुराजापरं
कीर्तितंच॥ एकैधकरीमरुत्तमदिनीचदृष्टिप्रदासुक्रविवर्धनीच॥ सश्वासकासारुचिनाशनिचवृता
करेषागुणसंसयुक्तं॥ तथैवहृतीफलमेवशस्तंसंदीपनंस्यात्कफवातनाशं॥ कंडूविसर्पज्वरकामि
लानांतथारुचीशस्तमिदंवदंति॥ इतिफलशाकगुणाः॥ कंदशाकंप्रवक्ष्यामिशृणुपुत्रपृथक्पृथक्॥ सू
रणाःपिंडपिंडालुपलांडुगृंजनंतथा॥ तांबूलकंदःपर्ण्यंस्याद्धस्तिकंदमथापरः॥ वाराहकंदोपरन्यस्यात्कं
दशाकाइमेस्मृताः॥ दीपनःसूरणोरुच्यःकफघ्नोविषदोलघुः॥ विशेषादर्शसांपथ्यःप्लीहगुल्मविशासनः
अर्शिकायाःस्मृतःकंदोग्रहण्यर्शोहितोलघुः॥ सूरणगुणाः॥ ॥पिंडकोवातलःश्लेष्मियाहिवृष्योमहा
गुरुः॥ पिंडालुकःश्लेष्मकश्चैवशुक्रकृद्दीपनोमतः॥ पलांडुवातकफहाशुक्रलःशूलगुल्महा॥ तांबूलपर्णकंद
स्याप्युक्तोविशदोमृदुः॥ हस्तिकंदोगुरुर्ग्राही शुक्रलोविषदोमृदुः॥ वराहकंदोअर्शोघ्नोवातगुल्मनिवार
णः॥ अन्येयेवातकंदाश्चतेनप्रोक्तामयाननघ॥ सर्वेषांकंदशाकानांसूरणश्रेष्ठउच्यते॥ दीपनोर्शसांथागु
ल्मकृमीप्लीहविनाशनः॥ दद्रुणांरक्तपित्तानांकुष्ठिनांचप्रशस्यते॥ एतेकंदामयाख्याताश्रीमतांहिप्रि
यंवरः॥ इतिकंदशाकः॥ इतिशाकवर्गसमाप्तः॥ ॥अम्रजंबूचकोलंचदाडिमामलकंतथा॥ खर्जूरंच

परूषकंचमातुलिंगंप्रियालुजं॥ नारंगंचाम्लिकाचैवद्राक्षाचकरमर्दकं॥क्षीरकामधुकाश्चैतेफलवर्गप्रकीर्तिताः॥आपक्कमाम्रफलमेवशास्त्रसंग्राहिपितास्रजकोपनंच॥तच्चापिपक्कंमधुरंचसाम्लंश्लेष्मसपित्तानयनाशनंच॥इत्याम्रगुणाः॥जंबूग्राहीमधुरकंकरोचनोवातहारिकोलंचाम्लंमधुरमथवाश्लेष्मलंग्राहिशस्तं॥श्लेष्मवातादिकरजंहरंदाडिमंवातिसारं॥भवतिप्रोक्तंमधिकंमधुरंस्वादुराजादनंच॥परूषखर्जूरकंपीलुकानांप्रियालुसिंहीकरकरमर्दकानां॥फलानिमेहानुहितसर्वमेतत्रिहंतिपित्तंरुधिरंसवातंपस्यान्मातुलिंगंकफवातहंताक्रमिनिहंताजठरानलघ्नः॥सदूषिरक्तविकारपित्तंतृदाघनंशूलविलविकारहारी॥श्वासकासरुचिहरंतृष्णाहृत्कंठशोधनं॥लघुदीपनंरुच्यंचमातुलिंगमुदाहृतं॥त्वक्तिक्तादुर्जरातस्यकृमिवातकफापहास्वादुशीतंगुरुस्निग्धंकफंहंतिवातपित्तजित्॥मेध्यंश्लेष्मानिलहृद्यंदीपनंकफरोचकनाशनं॥दीपनंलघुसंग्राहिदुर्मार्गशोधनंतु केशरं॥पित्तमारुतहृल्लासपित्तलंबडकेशरं॥हृद्यंवर्णकरंरुच्यंरक्तमांसबलप्रदं॥शूलाजिर्णविबंधेषुमंदाग्नौकफमारुतौ॥अम्लचिंचासकासेषुरसस्तस्यापदिश्यते॥रसेतिमधुरोहृद्योविद्याद्पित्तानिलापहा॥कफकृद्दुर्जरःपाकेमातुलिंगकराहकः॥चेतोहारीरसेनप्रथयतिकटुतामम्लतांचाविधत्ते हृद्रोगोदानगुल्मश्वेसनकफहरःप्लीहरोगस्यहंता॥वीर्यादशांसिका २४

संग्रहणिमपहरत्यग्निकृपाचनोयंसंधत्तेरक्तपित्तंपरिणतिसमयेकेशरोमातुलिंगे॥मूलंतुल्मिहृत्तिक्तंपुष्पंशीतंचगुल्महृत्॥बीजंगुरुणगुणाः॥निचूकंलघुमिसमूहनाशनंतीक्ष्णमम्लमुदरग्रहापहं॥वातापित्तकफशूलिनांहितंनष्टधान्यरुचिशोधनंपरं॥त्रिदोषसंज्वरपीडितानांदोषाश्रितानांविषविक्रियाणांमलप्रवृत्तेहबहुगुदेहिमंतद्विशूचिकायांमुनयोवदंति॥ ॥ इतिनिचुगुणाः॥ ॥ नारंगंस्वाद्वम्लंगुणोपपन्नंसदीपनंरोचनंकफघ्नंस्यात्॥त्रिदोषहाशूलकृमिरुजानांमंदाग्निकासश्वसनापहारी॥नारंगं॥ ॥ अम्लंहिचाम्लीफलमेवपक्वंतदस्रपित्तातिकरंविदाहि॥वातामयाशूलहरंप्रशस्तंपक्वंतथाशीतगुणोपपन्नं॥आमलकीद्राक्षाफलंमधुरमम्लकषायमुक्तंक्षारेणपित्तमरुतांकफहारिशीघ्रं॥श्वेतंनिहंतिरुधिरामयदाहशोषमूर्च्छाज्वरःश्वसनकासविनाशकारी॥कषायोम्लविपाकेचद्राक्षाचैवफलेहिताः॥इतिद्राक्षागुणाः॥ नारिकेरंसुमधुरंगुरुस्निग्धंचशीतलं॥हृद्यंसंतर्पणंवस्तिशोधनंरक्तपित्तनुत्॥विष्टंभिपक्वंधमतोन्यपक्वंकफवातलं॥तृष्णंशीतलंहृद्यंनारिकेलफलंविदुः॥ नारिकेरफलंगुरुहृद्यंमनोज्ञंकफहृद्विकारी॥शीतंचसंतर्पणमौत्यमेव॥रक्तंचपित्तंश्वसनंचहृद्यंपक्वंचरंभाफलमेवहंति॥ ॥अपक्वंसंग्राहिसुशीतलंचकषायकंवातकफोकरोति॥विष्टंभिबल्यंगुरुदर्जरंचआरण्यरंभाफलमेवतद्वत्॥इतिकदलीद्वयगुणाः॥ ॥कपित्थ

आत्रे॰ कोल्लं मधुरं कषायं विषदं गुरु॥ हृद्रोग कासातिसारछर्दि कंठामयापहं॥ कपित्थफलं॥ मधुरं शीतलं ग्राहि संहितं
कषायं विषदं गुरु॥ अपक्वं खर्जूरफलं त्रिदोषशमनं मतं॥ पक्वमेव हितं श्रेष्ठं त्रिदोषशमनं परं॥ इति खर्जूर
फलं॥ ॥ इति फलवर्गः॥ ॥ आत्रेय उवाच॥ अतो वक्ष्यामि माक्षीकं त्रिविधं शृणुपुत्रकः॥ भ्रामरं सारघं क्षौद्रं
तेषां वक्ष्मि गुणागुणं॥ शीतं कषायं मधुरं लघुस्यात्संदीपनं लेखनमेव शस्तं॥ संशोधनं व्रणशोधनं च संरोह
णं हृद्यतमं च बल्यं॥ त्रिदोषनाशं कुरुते च दृष्टिं कासक्षये वाक्षतजे च पथ्यं॥ हिक्काश्रमश्वासपीनसानां
मे रक्तेप्रमेहेश्वसनातिसारे॥ रक्तातिसारे च सरक्तपित्ते तृण्मोहहृल्लासमदेषु शस्तं॥ नेत्रामये वाग्रहणी
गदे वा विषप्रशस्तं भ्रमरोत्थितं च तत्॥ इति भ्रमरं मधु॥ ॥ भ्रामरं सघनं जाड्यभ्रमिघ्नं मधुरं च तत्॥ क्षौ
द्रं विशेषतो दृष्टं शीतं लेखि लघु स्मृतं॥ तस्मात्लघुतरं क्षौद्रं सारघं नातिशीतलं॥ कासेक्षये क्षतेऽग्नेर्वा कामला
र्शोविनाशनं॥ सारघं मधु॥ ॥ नातिशीतं न च लघु दीपनं बलहृन्मतं॥ अतिसारे नेत्ररोगे क्षतेवाक्षतजेहितं॥ इति क्षौद्रगुणाः॥ ॥ भ्रामरं वृक्षसंस्थाने विटपे सारघं भवेत्॥ रंध्रेपि कोटरे वापि क्षौद्रं तत्रप्रदृश्यते॥ इति मधुगुणाः॥ ८॥ गौडी माध्वी तथा पैष्टी निर्यास्य कथिता पराः॥ एवं च तु विधा ज्ञेया सुरा ता सांप्र
भेदिकाः॥ भेदनाद्दशधोक्ता सुरा सोवीरकारकाः॥ सुधी गौडी च मस्यंडि शुक्तनप्रभवान्नयः॥ मधि २५

कं मधुकं माध्वं मधुना संयुता सुराः॥ पैष्टी मरिष्टजा तं च तंडुलप्रभवान्नयः॥ मधिकारससंभूता ताडमाडार
सोद्भवाः॥ निर्यास्यासा तु विज्ञेया नासां वक्ष्मि गुणागुणं॥ सिंधुकषायाम्लकं माधुरं च संदीपनं भेदि मलाप
मर्दि॥ आमातिसारीनिलपित्तश्लेश्मामयार्शोग्रहणीगदघ्नः॥ इति सिंधुसुरागुणाः॥ गौडी कषायाम धु
धुराम्लसाता संदीपनी शूलमलाग्निहंत्री॥ हृद्या त्रिदोषश्रमयत्सजार्णे पांडुमयार्शः श्वसनं निहंति॥ गौडी
नाम सुराः॥ ॥ हरति मलंक्षयं वादीपनं पांडुमेहान् लघुमधुरस्रंशीतारोचनी पित्तहंत्री॥ जरयति सकलं
वातक्षणं पीतमात्रं श्वसनरुधिरकासं हंति वा कामलार्तान्॥ ॥ शार्करा नाम सुरा॥ माध्वीकं शीतलं लघु
मधुरमपि कषायोल्लं कं नातिचोष्णं हंति पित्तामयार्शः॥ श्वसनमपि तथा चातिसारं प्रमेहं॥ शूलानाहोमम
र्दोदरगदनिचयं दीपयत्यग्निसाम्यं समान्येषां त्रयं तेनिखिलगुणगुणैः साम्यमाधिक्यकं का॥ इति मा
ध्वीकगुणाः॥ ॥ कषायामधुरा चाम्लासुरा संदीपनी हृद्या॥ कासार्शोग्रहणीशूलमूत्ररोगविनाशिनी॥
सुरागुणाः॥ पैष्टिसंदीपनीरुच्या कफकृद्धातनाशिनी॥ पित्तलापांडुरोगाणां कारिणी वृक्कधामता॥ पैष्टी
सुरागुणाः॥ वातपित्तकरी रूक्षकषायो विशदो गुरुः॥ श्लेष्मलो भेदनोग्राहीमूत्रकृच्छ्रशिरार्तिकृत्॥ मधुक
पुष्पमद्यं श्लेष्मदोषकरं हृद्यं वातलं श्लेष्मवर्धिनी॥ कासहृल्लासविट्बंधकारणं ताडमाडिकाः॥

आत्रे॰ चूर्णंकषायोपि च योगयुक्तो सुराहिता स्याद्बहुदोषहंत्री॥ निहंति वेश्लेष्मगदान शेषान् यस्मात्स्यमेना संहिता
न्मुनि योवदंति॥ चूर्णंनि चकषायेन योगयुक्ता सुराहिता॥ बहुदोषहराचैव श्लेष्मरोगच यापहा॥ भ्रमज्वर
तुरशोषशोफपांडुमयेश्वये॥ नमः कुमारायस्मारे मद्यक्षीणेभ्रमेषुच॥ श्रांतेवाविषमेवासर्वदृष्टेजलो
दरे॥ रक्तपित्तेतथाध्मासेवारुणीनहितामति॥ इतिश्रीआत्रेयभाषितेहारिद्रीतरेमद्यवर्गसमाप्तः॥ ॥०
अथमांसवर्गोच्यते॥ ॥आत्रेयउवाच॥ खुरणःशृंगिणश्चैवतासांचान्ये प्रकीर्तिताः॥ श्वापदःपक्षिणःश्वा
न्येमत्स्याश्चान्येसरिस्थपाः॥ जलचराजलाधाराग्रामारण्यनिवासिनः॥ आनूपाजांगलाजीवास्तथासा
धारणाःपरे॥ मृगरुरुधचित्रागोकृष्णतथागंडकएवच॥ नगवयमहिषाश्वासूकराश्चयेपिभवंतिविवि
धवर्णशृंगिणोग्रामवासी॥ गदितबहुमजाद्याःशृंगिणोग्रामकाद्याः॥ सूकराःक्रोडकूराद्याये खुरिणोभवं
स्यग्रामी॥ शशाकःशल्यकोगोधामार्जाराद्यानखायुधाः॥ सर्पमत्स्यादिकाये चविहंगमाः सरिस्थपाः॥ मत्स्य
मकरकाद्याये कच्छपादर्दुरादयः॥ हंससारसचक्राद्याःकपिंजलकमुरुकाः॥ अनूपास्तेतुविज्ञेयाःश्लेष्मलावा
तकोपनाः॥ इतिजलचारिणोजीवाः॥ शशालावकवार्ताकगोधाहरिणकूर्चकाः॥ क्रोडकूराद्यास्तथान्येपि
स्थिराद्याश्चपक्षिणः॥ भारद्वाजास्तथास्येनाभूषकावनचारिणः॥ इत्येतेजांगलाजीवायेजलेभ्यवि २६

नास्थिताः॥ इतिजांगलाजीवाः॥ सूकरोमृगसल्लादिसलिलाशयसंस्मृताः॥ मकरोरुरुगंधाकृगवयोने
वर्कराः॥ महिषाद्याश्चयेजिह्वाएतेसाधारणामताः॥ एतेभिश्राजिह्वाः॥ ऋक्षरवृकमरालाःकोकंकोलबकाः
हं ग्रा॰ टवरटकपिकभृंगाआदिदात्यूहसंज्ञाः॥ जलकरटकपिंजासारसाद्विहिंभाद्याजलचरविहगास्तेभासकारव
जरीद्याः॥ इत्येतेयेजीवाग्रामारण्यनिवासिनः॥ कुक्कुटकाकलंबिकपारावतकपोतकाः॥ पक्षिणोग्रामचारि
ण्योवर्त्तितेषांगुणागुणाः॥ शृंगिणांहरिणःश्रेष्ठोबल्योरोचनदीपनः॥ त्रिदोषघ्नोलघुःपाकेमधुरोज्वरिणांहि
तः॥ क्षयक्षतार्शसांपांडौअरोचकनिपीडिते॥ कासश्वासातुराणांचएणमांसंसुखावहं॥ इतिहरिणमांसवि
धिगुणाः॥ ॥ चित्रांगोवातशमनोबृंहणोबलकृन्मतः॥ श्लेष्मलःकथितोवापिदुर्जरोमेदवर्धनः॥ इतिचित्रलमां
सगुणाः॥ शिक्रोलघुर्हृद्यश्चमधुरोपदोषनाशनः॥ तुलयाहरिणमांससज्वरेचापिशस्यते॥ इतिशिक्रो॰
मांसगुणाः॥ तथैवगोगवयोर्महिष्योश्चतुरंगकाः॥ विबंधिगुरवःस्निग्धोवातलाश्चप्रकीर्तिताः॥ सोकरंचो
च्चनंहृष्यंदुर्जरंशमतांशनं॥ वातलंपित्तशमनंरुचिदंधातुवर्धनं॥ इतिसूकरमांसगुणाः॥ ॥ शशाकोजांग
लश्चैवलघुदीपनकोदृषः॥ रुचिकृत्तर्पणोबल्यःत्रिदोषशमनोमतः॥ ज्वरेचपांडुरोगेचतथाचसारि
णांहितः॥ शशाकमांसगुणाः॥ ॥ सल्लिकोमधुरोदाह्योस्नेहनोबलकृन्मतः॥ वातश्लेष्महरोहृद्योमधुरो

आत्रे॰ रुचिवर्धनः॥ सलुकः॥ सलिलोद्भवहरिणबल्यस्निग्धरुचिकरप्रदं॥ वातलंकिंचिदुष्णंतुहरिणंमधुरंस्मृतं॥ संहिता
मांसतिलगुणाः॥ ॥अतिस्निग्धोबलःशुक्रवर्धनोमधुरोलघुः॥ कृमिदोषघ्नोवातहारिचसुपक्वः॥
सूपकमांसगुणाः॥ ॥इतिचतुष्पदमांसं॥ ॥अथपक्षिणांमांसोक्तं॥ ॥पक्षिणांचमहाश्रेष्ठोलावकोजांगलोमत
कः॥ संग्राहीदीपनःश्रेष्ठोकषायोमधुरोलघुः॥ तथाविष्किरकटुकःसंनिपातेतिपूजितः॥ लावमांसंसंनिपा
तहरं॥ तथैवतित्तिरोरुक्ष्योमेधाग्निबलवर्धनः॥ सर्वदोषहरोबल्योलावकःसमतागुणाः॥ वार्ताकोवि
षदोरुच्योयथालावस्तथैवच॥ गौरकृष्णकपेदेनश्रेष्ठोगौतित्तिरः॥ तत्तीयतित्तिरोन्योपिसामान्योगुण
तोमतः॥ सवातलोतिबलकृद्घनःकिंचिदुसायनःमेधाहृद्श्रोतसांचकरोसुत्यारमंहिरवी॥ नीलमयूरः॥
सुस्निग्धोश्लेष्मलोरुक्ष्योघनोबलवर्धनः॥ मांसरुद्धिकरोबल्योहितियस्यान्मयूरकः॥ तथैवकुक्कुटेइ
यामधुरस्यागुणात्मकः॥ कुक्कुटद्वयं॥ कपोतहरिणीबल्यौवातपित्तविनाशनः॥ संतर्पणोशुक्रजननोहितो
नृणांरुचिप्रदः॥ ॥ कपोतकः॥ ॥तथापारावतोज्ञेयोवातश्लेष्मकरोगुरुः॥ बल्योरुच्यातिरुचिकृत्तथाहारी
तकोमतः॥ लघुश्चकरोज्ञेयोकायाग्निध्यूषणोरुषः॥ तथालघुवातैरीकाकुक्कुटोग्निवर्धनः॥ अश्मरीहृतिवि
षदोषबलकृच्छुक्रवर्धनः॥ वातश्लेष्माधिकोज्ञेयःशीतलोबलवर्धनः॥ चकोरोपितथासारिःसमादोषगुणा २

२ रक्तचित्तहराहृद्यास्निग्धामधुरशीतलाः॥ श्वासकासहराश्चोक्तागोधाचाशोहितामताः॥ गोधामांसंगुणैः

गुणैः॥ शुकाशारिका॥ क्रौंचोरुच्योतिरुचिकृद्दमरीहंतिचानृणां॥ शोषमूर्णकरोदीप्योहंतिकासमरोचकं॥ क्रौंचा॥
कोकिलाश्लेष्मलाज्ञेयापित्तसंग्रहनीमताः॥ कोकिलः॥ बल्यहिकोभिदोषघ्नोगुल्मशुक्रविवर्धनः॥ षल्यहिको॥
ग्रहचटकोमहारुच्योबल्यःशुक्रविवर्धनः॥ सर्वदोषहरश्चापिदीपनोमांसवर्धनः॥ स्थलजलचराणांचमांस
वर्गःप्रकीर्तितः॥ पिप्पलंतुनराणांचमांसवर्गंहृद्यासिनः॥ इतिस्थलचराणांमांसवर्गः॥ इदानीजलसेविनांमां
सवर्गउच्यते॥ हंसःश्लेष्मकरोतिबल्यरुचिकृद्रुच्योगुरुःशीतलस्तद्वच्चक्रवाक्यांशुक्रजननोरुच्योरुच्योमूढः
ज्ञेयःसर्वसिकःकफानिलहराःपित्तस्यकारीसरःरुच्यःपुष्टिविवर्धनःकफहरःकुक्कुटस्तथाभारवकः॥आरीवाताव
नाश्यकाश्यहननीबल्यारुषादीपनीक्रौंचश्चाश्मरीशुक्रदोषहननस्तुल्यस्तथाकुक्कुटः॥ हासुकोपवनस्यनाशनत
नोरुच्योबलःशुक्रदोमाकुश्रेष्ठगुणःश्रमोपशमनःशुक्रप्रदोवातहाः॥ तिलपक्षीमांसवर्गः॥ मत्स्यानांचगुरुःश्रे
ष्ठोदीपनीवातनाशनः॥ रुचिप्रदःशुक्रकरःश्वाश्मरीदोषनाशनः॥ गुरुमत्स्याः॥ ॥शृंगीवातविनाशनीरुचि
करीरुच्याकफघ्नीमतः॥ कंगाकोविषदोरुषोनलकरोवातेकफेपूजितः॥ पाठीनोबलरुच्यशुक्रजननःश्लेष्मा
करोपित्तल्याहृद्यः॥ तस्माद्धितकोहितोबलकरोवातात्मकःश्लेष्मकः॥ श्लेष्माकरीतुशफरीनलमीनकफात्मकः॥
शकुलीचविशालोचज्ञेयोवातकफात्मकः॥ चिलचित्तस्तथाज्ञेयवातलःकफकृन्मतः॥ मत्स्यमांसः॥ कत्स्योमधु

आत्रेयः स्वादुशुक्रकृद्धिकरोमतः॥ वातश्लेष्मप्रजननो हृद्यो रूक्षे च॥ कणपः॥ कुलीनातिबलो हृद्यः पांडुक्षय संहिता
विनाशनः॥ इति कोलतिसारघ्नः कणविरेणस्त्रियाहितः॥ कुलीरमांसं॥ मकरोदीपनो हृद्यो ग्राही च विकाशिरहः॥ मूत्राश्मरीणां शमनो गुल्मातीसारनाशनः॥ मकरः॥ काकः कोकिलसेनसूकरखरोष्ट्राश्वदंशमशूलकाः॥ ब्याडः सोरभवेसरमग्रभृतयोये तेचजांगलाः पक्षिणः॥ मंडूकाश्च शरीरपादिकगुणाः॥ घूकाः कलिंगाश्च ये काकः सारससारिकाशुकइमेभक्ष्यानशास्त्रात्पुनः॥ गृहचटकबकोराः काकधान्याश्च सेतुः पिकशुकशयवाबाभृंगदात्यूहमुद्गुः॥ जलकरककपोतिपोतकीखंजरीटः कुकरमथकलिंगोयूकपिंगाद्यन्योन्ये॥ एतेभक्ष्यानेवभक्ष्यानवेक्षायेचान्येचाज्ञातनामोड्डाश्च॥ अन्येचापिश्वापदायेचनिंद्यास्तेचस्युर्येवर्जिताश्चात्रसर्वे इतिमांसवर्गः॥ ॥९॥ अथातोभोजनवर्गंव्याख्यास्यामः॥ मंडः परिश्रुतोभक्तर्पणोवातनाशनः॥ मूत्रमेहाश्मरीकृच्छ्रिरुचिहृन्मूत्रलोमतः॥ अश्रुसंज्ञोभवेत्क्लेदहिमधुरोवातकफात्मकः॥ तर्पणः क्षयदोषघ्नः पुष्करद्धिकरः परः॥ अपसादितभक्तः॥ युगंधराणांभक्तश्च घनोविशदमाधुरः॥ करोतिदोषनाशंचश्वासकासात्मकंप स्मृताः॥ युगंधरामभक्तः॥ संदीपनीस्वेदकरायवागूस्तुचनीदोषमलावलानां॥ संतर्पणीधातुबलेंद्रियादि यांणांस्तंभवेत्साज्वररोगिणांच॥ भागेकंचभवेत्तंद्विभागेनजलंक्षिपेत्॥ चित्रकंपिप्पलीमूलंपि

प्पलीचव्यनागरं॥ धान्यंकंचसमांशानिपिष्ट्वाश्वेताश्चतंडुलान्॥ संसिद्धाशिथिलाःकिंचित्सामंवागूर्निगद्यते॥ यवागूमुपयुंजानोनतुव्यंजनमाचरेत्॥ शाकमाषफलेर्युक्तायवागूस्यात्सुदुर्जरा॥ इतियवागूः॥ पिंडकोल कधान्याकतथातैश्चरास्नाचितःपुनः॥ मंडस्त्रिदोषशमनोज्वराणांपाचनःपरः॥ मंडः॥ ॥पायसंगुरुविष्टंभिश्लेष्मारुचिकरंसमृतं॥ पित्तसंशमनंबल्यंहृद्यंश्रेष्ठरसायनं॥ इतिक्षीरगुणाः॥ ॥गुरुविष्टंभिजननीवातश्लेष्मकरीमता॥ पित्तसंशमनीबल्याहृद्याचैवबलप्रदा॥ मुद्गतंडुलसंयुक्तामाषतंडुलवापुनः॥ अन्यथाधान्यगुणवल्लक्ष्यतेभिषग्वरैः॥ तिलैश्चसंयुताहृद्याधातुपुष्टिविवर्धिनी॥ गुरुर्विष्टंभिमलकृत्कुलत्थोदुर्जरोमलकोपनी॥ कौलत्थगुणाः॥ ॥ स्नेहमुक्तंत्रिदोषघ्नंबृंहणंबलवर्धनं॥ स्नेहगुणाः॥ ॥ वातकफहरोहृद्यस्वल्पोबलकारकः॥ स्वल्पगुणाः॥ ॥ कफानिलहरोहृद्योदीपनोदाडिमंस्मृतं॥ दाडिमंमम्ल॥ पर्पटस्तेलसंभृष्टोदोषाणांचज्वरापहः॥ रुचिबलकृच्छ्रवेदाघशोषतृषापहः॥ संग्राहकाचगुरुस्निग्धादुर्जरागुरुशीतला॥ पित्तश्लेष्मकरीबल्याधातुनांचबलप्रदा॥ गुडदधिप्रमर्दिताहिताक्षीरवारिणीस्मृता॥ धातुवृद्धिकराहृद्यावातपित्तविनाशनी॥ क्षीरवारिणी शीतलः पित्तशमनीश्रममूर्छातृषापहः॥ खंडयुक्तोतिवाश्रेष्ठोघृतयुक्तोजलाधिकः॥ सक्तुगुणाः॥ ॥

आत्रे॰ सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः॥ नातिस्थानातिसांद्राश्च मंथइत्यभिधीयते॥ मंथः॥ सद्योवृ संहता लक्रमर्दिपिपासादाहनाशनः॥ साम्लस्नेहश्चसगुडोमूत्रकृच्छ्रश्रमापहः॥ इतिमंथगुणाः॥ ॥ सिद्धं मांसंघृतेसवारेणोक्तं बल्यंश्रेष्ठंस्वादुसंदीपनंच॥ दाडिमलवणस्नेहवह्नीचनंचश्रेष्ठं वैद्यैःसंसितंरोगिणांवै॥ ३ लवणैसमायुक्तं दुर्जरंदीपनंस्मृतं॥ न हिमांसमकिंचिदन्यदेवबृहत्वकृत्॥ मांसादमांसंमांसेनसंभृतं तत्वाद्विशिष्यते॥ मांसगुणाः॥ अंगारेःअपिपक्वायावातिकादीपनीलघुः॥ बल्यावृष्यस्नेहसंयुक्ताधनाधन गुणात्मकाः॥ इत्यंगारकगुणाः॥ अंगारमंडकोहृद्योदीपनोरोचकःकफापहा॥ त्रिदोषघ्नोयवाग्राह्योज्वरिणांशस्यतेहितः॥ अंगारकमंडकाः॥ सत्यकवरेपक्वाघोरोचनीमधुराहिमा॥ कफवृद्धिकरीबल्यापित्तरक्तप्रदायिनी॥ पोलिकागुणाः॥ पूरिकाघृतपूरंचत्रिदोषशमनंपरं॥ हृद्यंसंतर्पणंस्वादु क्षतक्षयनिवारणं॥ पूरिकागुणाः॥ ॥ गुरुष्णोदुर्जरोज्ञेयो वातश्लेष्मकरोगुरुः॥ पूपकःस्वादुहृद्यश्च हृष्योवातानुलोमनः॥ इतिपूपगुणाः॥ सोमालिकाघनास्वादुलोचनाबलवर्धनी॥ दुर्जरादोषशमनाहृष्यामुष्करणीमता॥ सोहालगुणाः॥ हंतृणावातपित्तघ्नी घृतपथ्यालघुतरामता॥ फेणिकारोचनीबल्यासर्वधातुबलप्रदः॥ इतिफेणिकागुणाः विष्टंभिमधुराहृद्यागुरवोवातकफात्मकाः॥ सर्पिष्कोवातदोषघ्नोदुर्जरोजायते॥ १ ॥अंगतामतिहृद्यंचदीपनंश्लेष्मनाशनं॥ २

पुनः॥ आईवटकगुणाः॥ अग्निभोदुर्जरोबल्योघनतृष्णाप्रदःस्मृतः॥ कोशवटकगुणाः॥ लडुकास्तर्पणाबल्यो दुर्जराश्लेष्मकारकाः॥ मंदाग्नोनप्रशंसंतेमोदकाःबकुवर्णकाः॥ द्रव्यगुणविशेषेण रसास्वादेनवापुनः॥ मोदकगुणाः॥ उष्णानावेंडराबल्याकफदोषहरीमताः॥ हृद्यावीर्यप्रदाज्ञेयादोषलावार्यबंधनी॥ यव पोलिगुणाः॥ विदलानस्यवानिसिद्धकृपणेन वा॥ रुच्यावान्यविशेषेण दोषान्वितयतामवेत्॥ अन्यानि चान्नपानानि नेयोक्तानि मुनीश्वरैः॥ ग्रंथविस्तारभीरुश्चलोकोनोवाचनक्षमः॥ इत्यन्नवर्गसमाप्तः॥ श्रमातेभोजनंयस्तुपानंवाकुरुतेनरः॥ ज्वरंसंजायतेतस्यछर्दिवातक्षणाद्भवेत्॥ कृत्वातुभोजनंसद्यो व्यायामंसुरतंतथा॥ यःकरोतिविपत्तिस्यात्तस्यगात्रसमुद्भवाः॥ नचातिस्निग्धभुक्तेन चोष्णंभोजनंहितं॥ कुर्याद्वानकफोत्पत्तिरुष्णंभवतिसारकं॥ नश्रांतेभोजनंकुर्यान्नव्यायामंसमाचरेत्॥ विषमाशनभोक्तव्यं करोतिविविधान्गदान्॥ आदौफलानिभुंजीतवर्जयित्वाथकर्कटी॥ ननक्रंदधिभुंजीतनशीतंरूक्षकृतथा॥ भोजनोद्वेचक्रमणंशतपादंशनैःशनैः॥ पश्चाद्गच्छेन्नशयनंततोवामेक्षणंस्वपेत्॥ भुंक्तोपरिसमाचम्यमार्जयित्वाक्षणौकरैः॥ पुनर्दक्षिणहस्तेनमार्जयेदुदरंसुधीः॥ गुरुभारंमलमुदरंनोदारस्यचधारणं॥ व्यायामंचव्यवायंचधावनंयानमेवच॥ युद्धंगीतंचपाठंचक्षणंभुक्तेविवर्जयेत्॥ नमद्यपीतंपूर्व

नंधावनेनचसंगरं॥नयानवाहनारोहंव्यायंनचकारयेत्॥नदिवास्वापंतुहितंभुक्तोपरिचविश्रयेत्॥
कालमश्नाश्लेष्मा प्रतिश्यायोपपद्यते॥क्षयश्शोफशिरोर्तिःस्याज्जायतेचाग्निमंदता॥नचपानेपरिश्रांते
हिक्काश्वासातुरेषुच॥भयशोषरुषार्त्तानांपठनाग्निश्रमेतनच॥व्यायामेवृद्धवालेचभाराक्रांतेतथातुरे॥
अतीसारेचशोषेचतृष्णाप्लीहोदरेषुच॥ग्रहणेचाल्पनिद्रादृष्टादिवास्वापंहितंभवेत्॥इत्यात्रेयभा
षितेहारीतोत्तरेअन्नपानादिकंनामप्रथमस्थानं॥१॥ ॥१॥ ॥१०॥ आत्रेयउवाच॥अथा
तःसंप्रवक्ष्यामिद्वितीयंस्थानमुत्तमं॥शुभाशुभानिस्वप्नानिस्वस्यारिष्टानिमानुषे॥शृणुपुत्रसमासेन
यथावत्संप्रकाशते॥हारीतउवाच॥॥ज्ञातंमयामयाप्राज्ञअन्नपानंमहोत्तमं॥इदानींश्रोतुमिच्छामिरोगा
णांयोगविज्ञानं॥कर्मजाव्याधयोयेचतेशृणुत्वंमहामते॥आत्रेयउवाच॥कायरोगोनामपुरुषस्यकृत
दुःखकर्मबंधनः॥कर्मजाव्याधयःसर्वेसंभवंतिवारिणां॥सर्वेनरकरूपाश्चसाध्यासाध्याभवंतिहि॥
अज्ञातेवाहतेपापेकृच्छ्रंसमाचरेत्॥प्रायश्चित्तंचलेनापिसाध्यरूपोभवेन्नरः॥ज्ञातरूपेण
क्रियतेपश्चात्कृच्छ्रंसमाचरेत्॥योगेपिप्रायश्चित्तेनरोगिकृच्छ्रेनसाध्यते॥ज्ञातरूपेणयस्यापिनैवंकृ
तंकरोतिच॥तेनसाध्योभवेद्रोगःपापात्प्रतिकर्मणः॥ब्रह्मघ्नोघ्नधरणीपतिघातकश्चआत्रेय ३०

तोयधरनाशकृतघ्नदारः॥स्वाम्यगनागुरुवधूकुलजाभिगामीएतेदृशाबलरूपविधागदाश्च॥पांडुःकुष्ठंरा
जक्ष्मातिसारंमेहामूत्रेअश्मरीमूत्रकृच्छ्रं॥शूलेप्लीहासोकासश्वासोव्रणश्चदोषाश्चतेपापरूपाभराणांपो
स्युः॥ज्वरोजीर्णंतथाछर्दिभ्रममोहाग्निमांद्यता॥यकृल्लीहार्शोषाश्चएतेचैवापदूषकाः॥व्रणंशूलंशिरः
शूलंरक्तपित्तंतथोर्ध्वगं॥एतेरोगामहाघ्नास्तुअपिदाणापाकृवंतिहि॥अन्येपिबहुधारोगाजायंतेपदोषसंक
रात्॥अतोवक्ष्येसमासेनशृणुध्वंतुमहामते॥ब्रह्मघ्नोजायतेपांडुकुष्ठीगोवधकारकः॥राजघ्नोराजयक्ष्मा
स्यात्तूआरामहातिसारकः॥स्वाम्यंगनाभिगमनान्मेहारोगाभवंतिहि॥गुरुजायाप्रसंगेनमूत्रशोथप्रम
रिगदः॥स्वकुलजायाप्रसंगाज्जायतेबाभगंदरः॥शूलापरोपतापेनपैशून्यात्स्वासकाशिनः॥मार्गवि
घ्नकरायेतुजायतेपांडुरोगिणः॥अभिज्ञापाटवंस्त्रियहृदापिप्रजायते॥सुरालयेजलेवापिसकृद्दूषं
करोतियः॥गुदरोगाश्चजायंतेपापरूपातिदारुणाः॥परोपतापाज्जायेतप्रदुस्तोहिमहाज्वरः॥परान्नवि
घ्नकरणाद्राजीर्णंभवजायते॥गरदःछर्दिरोगीस्यात्भ्रामकोभ्रमरोगिकः॥धूर्तापस्मारकोगीस्यात्कर
ग्नदोग्निमांद्यकः॥यकृल्लीहोभवेद्रोगोभ्रूणपातस्यपातकात्॥व्रणंशूलंशिरःशूलंपरतापोपकारणात्॥
अपेयपानकरतोरक्तपित्तीप्रजायते॥दावाग्निदायकोयस्तुजायतेचविसर्पकः॥बहुदोषप्रकोपीतुजा

आत्रेय उवाच ॥ परद्रव्यापहारेण जायते ऽरुणीगदः ॥ कुनखी स्वर्णयस्तेया त्सस्मृतितस्य जायते ॥ रूप्यस्तेया च्छि
त्रकुष्ठी स्ताम्रचौरो विपादुकः ॥ त्रपुश्चौरो सिध्मलस्या न्नागचोरो पवेङ्गः ॥ वर्चसे लोहचोरस्या त्स्फारचोरो संहिता ॥
तिमूत्रलः ॥ घृतचोरो नेत्ररोगी स्या त्तैलचोरो तिकंडुकः ॥ दोषवक्ष्यामि दंतः दुष्टवत्क्रोष्टदोषणः ॥ रसनो ज्ञो
जिह्वारोगी गोत्रहा लूतिकी व्रणी ॥ एतेचैव महादोषा अतोवक्ष्यामि तेस्फुटं ॥ गोदानंभूमिदानंच स्वर्णदानंसु
राचनं ॥ कृत्वापश्चात्प्रतीकारं कुर्यात्सांडो पशांतये ॥ तदप्रतीकृतंकर्म कुष्ठरोगोपशांतये ॥ गोभूहिरण्यदानं
च तथा मिष्टान्नदानकं ॥ तथाप्रतिक्रियां कुर्यात्कदाचिदपिसिध्यति ॥ मेहेसुवर्णदानेच शूलेश्वासेभगंदरे ॥ अ
श्वानड्वाहदानेन श्वासकासाद्विमुच्यते ॥ पदौचामलदानेच शास्त्रदानंभ्रमातुरे ॥ अन्नमंदाग्निमाद्यंचकं
न्यादानेंचगुल्मके ॥ महाशमरीविनाशाय लवणंचप्रदीयते ॥ बहुभोजनदानेनशूलरोगात्प्रमुच्यते ॥ विठ
पासिंचनेनाथनाशंयांतिबहुव्रणाः ॥ चतुर्विधेनदानेन साध्योहिग्रहणीगदः ॥ सुवर्णदानात्कुनखीशा
मदंतःसुखीभवेत् ॥ रोप्यदानात्चित्रकुष्ठं साध्यंवापिप्रदृश्यते ॥ नागदानेव्यंगरोगेत्रपुदानेंचसिध्मके ॥ व
र्चसेलोहदानेंचगोदानेंबहुमूत्रके ॥ नेत्ररोगे घृतंदानेंसुगंधंनासिकागदे ॥ तैलदानेंकंडुकेचजिह्वारोगेरस
स्यच ॥ गवांचशावदंतेचदेवानांसंस्तुतिस्तथा ॥ अन्येचकथयिष्यामि मनुष्याणांशरीरगाः ॥ स्वल्पाटपरनिंदा
यांपरतर्कणकारकः ॥ एतेमहागदाज्ञेया जायंतेपापसंचयात् ॥ यदिबातेनसिध्यंतिभवेन्नोपजायते ॥ २१

आत्रेय उवाच ॥ अतःप्रायश्चित्तंहितंकारयेद्भिषजांवरः ॥ ज्ञानंजन्मांतरंयावत्पापरोगोपभुंजति ॥ प्रायश्चित्ते
कृतेनापिनपुर्नजायतेभवः ॥ इतिद्वितीयकेप्रस्तुतेपापदोषप्रतीकारोनामाध्यायःसमाप्तः ॥ ८५ ॥ २५ ॥
आत्रेय उवाच ॥ शृणुपुत्रसमासेनयथावत्संप्रकाश्यते ॥ तथारिष्टपरिज्ञानंभेषजंसंप्रचक्षते ॥ का तिकोपेति
कश्चैवभयाद्वीनाबलादपि ॥ मूत्राविष्टेसचिंतेचषट्स्वप्नानिचवर्जयेत् ॥ संवत्सरेणफलदःसभवेद्भिया
मःस्वप्नःशुभाशुभकरःप्रथमेनिशयामे ॥ सांवत्सराधिफलदोद्वितीयेपियामेमासत्रयेपि फलदएवतृतीयके
स्यात् ॥ निशावसानेप्रवदंतिकेचित्दशाहकेस्याफलदोमनुष्ये ॥ चर्मदिनस्यांत्रासंतिसंतःषण्मासकेम
ध्यदिनेप्रदिष्टः स्वप्नेशुभानिभवंतिहिशुभाफलस्तथैवानिविवर्जितानि ॥ कापालिभस्मास्थिकपालशूल
कुर्वंतिनृणांचविपदंरुजांवा ॥ सर्वाणिकृष्णानिविनिंदितानिस्वप्नेनराणांविपदेरुजेवा ॥ कुर्वंतिचान्यानिच
वर्जयित्वा ॥ गोःहस्तिराजाद्विपवाजिवस्तु ॥ धवलकुसुमभंगाएनेत्रे ध्वजेचदंतदधिफलमथवस्त्रंचान्न
ताबूलपत्रं ॥ कमलकलशरत्नंरत्नभूषणंकांचनंच ॥ भवतिविभवसंपत्श्रेयसेरोगिणांच ॥ दिनकरनिशिनाथं
मंडलेतारकाणांविमलकमलकूजेःपूर्णपद्माकरेच ॥ तरतिसलिलराशेःपारनद्याःप्रपन्नेसुखमितिवि
भवानांव्याधिनांरोगमुक्तिः ॥ देवद्विजंवापितरंनृपंवास्वप्नेसुवाक्यंप्रवदेद्यथैव ॥ तथैवनान्यंभजतेनरस्य

यदस्यसौख्यंविपदंरुजंच॥ गोवाजिकुंजरनृपंसुमनंप्रशस्तंस्वप्नेपश्यतिनरःसरुजंसुखाय॥ इत्याद्यस्थित
स्यरुजनाशनसंभवायबंधोपिवैसुदृढंधविमोचनाय॥ योभूषणंपश्यतिमंदिरंवाकन्यांदधिक्षीरकरंकृ
तंवा॥ सुपुष्पवल्लीफलितंद्रुमंवास्वस्थेधनाढ्योरुजनाशनाय॥ स्वप्नेपयःपानमितिप्रशस्तंपानंसुरायाः
त्वथभोजंवा॥ घृतंयवागूक्षुशिरोदनंवाक्षीरंकाभोजनंकसुखाय॥ सितोभुजंगोदशनंकरायेनरस्यस्व
स्थेषुशरीरकेषु॥ सपुत्रलाभंभजतेधनंवानाशंविदध्याच्चमनंरुजानां॥ यःश्वेतवस्त्रांरमणींसुरम्यांस्व
प्नेसमालिंगतिवामनुष्यः॥ तस्यप्रकर्षेणश्रियःसुखंचसंपत्तिलाभंचरुजांविनाशं॥ योधान्यपुंजंतिलतं
डुलाश्चगोधूमसिद्धार्थयवादिकानां॥ धान्यास्तिरस्याभयनाशहेतुःस्वप्नेपिशुद्धंमनुजोहिनाय॥ सफलं
धनसंपत्तिदीर्घंरोगविनाशनं॥ सुखंचपुष्टिंतेज्ञेयंसंपूर्णेवांछितंफलं॥ इतिशुभानिस्वप्नानि॥ काकैःकंकैः
खरभुजगैःसूकरोलूकगृध्रैःजंबूकैःश्वाहृषखरमहिषातुरक्षेस्तुरुक्षैः॥ व्याघ्रैःग्राहैःमकरकपिभिः॥प्र
मुखंमाणंस्वकायंयोसौपश्येत्प्रभंतिनितरांहानितापंरुजंवा॥ योभ्यंजितात्मानुजंप्रपश्येत्सर्पिवसा
तैलविशेषतोवा॥ नाशंद्रुतंरुजांसिलभंतेनरस्तु॥ वदंतिधीरानिपुणंविधायं॥ व्याघ्रोष्ट्रखरसंयुक्तैर्
यतेसैरभसंयुतैः॥ रुद्यमाणोदिशायाम्यांसंगच्छेद्यममंदिरं॥ रक्तवस्त्रांकृष्णवस्त्रांमुक्तकेशां ३२

विरूपिणां॥ यामांश्रितांयदारौतिगायतेवानधावति॥ अथाक्रुतिसंरुद्धासमालिंगतिचवांति॥ यःपश्यति
सुखीस्वप्नेबाधितोमृत्युमिच्छति॥ यःस्वप्नेचवमिःकृष्टंतप्तंचदृश्यते॥ विशीर्णकेशरोमाणंससुखी
चापदंलभेत्॥ यस्तुखड्गासिकुंतैस्तुतोमरादिप्रहारकैः॥ रक्तंचदृश्यतेदेहोस्वस्थेपिव्याधिमिच्छति॥ शू
न्यागारंदृश्यतेयेनयेवाप्रासादंवादेवहानंचपश्येत्॥ यतःश्वाद्रेपुष्पितेवाद्रुमाणांतस्यानिष्टंमृत्युमा
शुप्रपद्येत्॥ यदापश्यतिभिन्नदेवंगृहंवातथाभग्नशाखंतरुंमंदिरंवा॥ विशीर्णंपश्येद्व्याधियुक्तोमृतिंवा
सुखंवाविपद्येद्रुजायत्तमाशु॥ यस्याक्रुतिंपितरौदक्षिणस्यां॥ आश्रीसचाशुतनुतेमनुजस्यमृ
त्युः॥ यस्यापिशूलंलकुटंघृतपाशंपाणिआह्वयतेसमृतिमाशुतनोतिस्यां॥ कार्पासभस्मास्तिकपोशून
लंचक्रंचपाशंयदिस्वप्नपश्येत्॥ तस्यापदंरोगधनेक्षयंवारोगामृतेवातनुतेतिकृष्णं॥ इतिप्रदिष्टानिशुभाशु
भानिनिशासुस्वप्नेमनुजोविशेषात्॥ तथासुविज्ञायमहामतेत्वंगदस्यनाशायविधेयमंत्रः॥ स्नानंचदा
नंचसुरार्चनंचहोमंतथाभोज्यविधोनंकंच॥ दुःस्वप्नमेतेनसुविनाशमेतिशुभासुभानिव्यतनोतिशीघ्रं
इतिस्वप्नाध्यायः॥ ८॥ ८॥ ॥८॥आत्रेयउवाच॥ शृणुचान्यंमहाप्राज्ञसर्ववेदार्थसाधकः॥वैद्य
शास्त्रंचसारंयत्स्वस्यरिष्टंचमानुषे॥ मयोनपश्येध्रुवंसम्यक्स्वर्नदीमनुजंबुधः॥ तस्यषण्मासमा

सुजा वो व्रजेच्छ्राद्धयमस्य लोके॥ यः कर्णधोषेन शृणोति दा सो मूनाश्च यूकाः प्रपतंति भा लात॥ यो वै परि
त्यं विशृणोति शा हूमा सहृयं प्राप्य जहाति जी वं॥ यः स्वस्त देहस्य सतेमुखेन नेत्रेरुणेश्या वमथैश्चास्य जिका व
विवर्णा दशनाश्च रूक्षास्य स्यापि शीघ्रयमलोकगंता॥ यः सूर्य बिंबेन्दुशिनस्य पश्ये द्विनापरीवेष सवेष्य
माणः॥ धूमा वृतं वारवि मंडलंयः प पश्यतेशीघ्र मृतिं च गंतो॥ यस्य प्रभाते च शिरोव्यथास्या दीपे परातेथ
निमेष माणः॥ विपश्यतेयः पठलंच रेणोः सवै मृतिं याति नदीर्घ मायुः॥ स्वस्थेनिरभ्रे गगने विपश्येत्यः
शक्रचापं विदिशादिवासुत॥ तथैवविंधान्नयनाग्नतोयं सशीघ्र वैवस्वतलोकगंता॥ योनेत्रे मीलितेविद्यु
तिरथचपलांपश्यतेयः पुरस्ता कर्णेरंध्रं निरुध्यंध्वनिरथमनुजोनोशृणोतिश्रुतिभ्यांयस्तिक्तानाकथ
मपिरसनास्वादमेवं नवेत्तिसद्याकवैवस्वतंप्रतिगमनंदृश्यते मानवस्य॥ यस्यासुरुक्षशरीरंशिरसमथम
नुष्यस्ययस्याविलंबेशीतंनोवेत्तिचोष्णंहिमजलसिचनेरोमहर्षोनयस्य॥ दंडाघातेनराजीनभवतिसयु
नःश्राद्धदेवस्यलोकेलोकानांदर्शनायकुतमितिरुचिरास्वस्थतांनप्रयाति॥ तैलेजलेदर्पणेघृतेवाप
रस्य नेत्रे प्रतिबिंबमात्मनः॥ नपश्यतेयोयमलोकगंता जानाहितंजीवविहीनमेव॥ यस्यजिह्वाम ३३

वेश्यामापान्नाचानिलसंभवा॥ श्वासोभवतिवायुसशरीरंपुलकांकितं॥ नेत्रेनिलेरूपेपिते कंठेसुघुरघुरा
यते॥ नजीवतेज्वरार्तस्तुलक्षणंयस्यचेदृशं मुखेश्वासोभवेद्यस्यश्यामादंतावलीभृशं॥ स्तब्धेनेत्रेबला
द्यस्यान्ज्वरार्तोनैवजीवति॥ बहुमूत्रोबहुमूत्रोबद्धांहुश्वासीक्षामारोचकपीडितः॥ कृतघ्नेंद्रियोय
स्तुज्वरार्तोशीघ्रंविनश्यति॥ यस्यास्येत्रवतेरक्तंशिरोतिर्यस्यदृश्यते॥ दारुणोपद्रवश्चान्योभूयिष्ठंबहुरू
पवान्॥ तेनमृत्युंवशंयाति सिद्धिंनेच्छतिदारुणः॥ यस्यादोदृश्यतेचैवचातिसारस्तथाज्वरः॥ श्वासश्लेषार्ति
र्यस्यस्यात्सोपिशीघ्रंमृतिंव्रजेत्॥ यस्यातिसारःश्लेष्मस्तुतथारोचकश्शूलवान्॥ सोपिशीघ्रंमृतिंयाति बहु
भिःप्रतिकर्मभिः॥ बालस्यचातिवृद्धस्यक्षीणस्यविकलस्यच॥ जायतेसर्वगःश्लेष्मस्तुश्लेष्मेनम्रियतेध्रुवं॥ य
स्याध्मानंचशूलंचश्वासस्तृष्णाचमुच्छनं॥ शिरोर्तियस्यदृश्येतशूलीमूत्रंसुमवाप्नुयात्॥ पांडुत्वंकृपांडुरेनेत्रे
मूत्रंवापांडुरंभवेत्॥ पांडुसंधातदृक्चैवपांडुरोगीविनश्यति॥ धातुक्षीणोभवेद्यस्तुश्लेष्मश्वासेनपीडितः॥
बहुभोज्यौषधंतंवाश्वराजयक्ष्मीविनश्यति॥ विड्बंधश्वासश्लेष्मातुतथाचज्वरपीडितं॥ [illegible]
गंभीरंसघनंयत्तुडुदरंक्षपतेनरं॥ नेत्रेजिह्वाधरोयस्यरक्तोवारुधिरंवमेत्॥ रक्तमूत्रीरक्तसारीरक्तपित्ती
विनश्यति॥ मुखेश्लेष्मोभवेद्यस्यभ्रमारोचकपीडितं॥ विबंधोदरशूलंचगुदजाक्षयंतिहि॥ यस्यतृष्णाभवेत्

आत्रे॰ चोरादाघोवा पिवुमिर्भवत्॥ त्रमोपपन्नोभवेतिनसजिवतिमानवः॥ आयुर्णादवसेनारीज्वरातीपुष्पासंहिता
मुयात्॥ सानजिवेन्महाप्राज्ञेतृस्नायुक्तोथशूलवान्॥ कामलापांडुरोगीतंनरश्चाप्युविपद्यते॥ इतिव्याधा
रिष्टानि॥ ॥ यःशीलवान्क्रोधनतामुपेतियःक्रोधवान्शीलगुणंप्रपद्येत्॥ हावेवमृत्यूतनुतेविधिज्ञःस्थू
लोनरःशीघ्रतरंकृशांगः॥ योधर्मशीलोभवतेथवापिपापात्मनोधर्मरतोविधिज्ञः॥ समृत्युभाजीभवतोक्षि
शीघ्रंसवैमृतिंपश्यतियोनपश्येत्॥ छायांस्वकीयांधरणीप्रपन्नोयोवैकबंधाकृतिमस्तकेन॥ विनाशच्छिन्
चभुजांघ्रिहीनांकृशांचहीनांभुविपश्यतेयः॥ छायांमृतिंगच्छतिवैमनुष्यःपंचेंद्रियैःप्रतिहितैकशतोप्रया
ति॥ स्थूलोस्थिनाप्रभवपुर्मरणंप्रपश्येत्॥ योवैसुगंधश्चरसोनगंधःसवैमृतिंगच्छतिवैमनुष्यः॥ यस्यास्यगं
धमाघ्रायभजतेनालमक्षिकः॥ नासिकायांशरीरेचसोवैवस्वतलोकगः॥ इतिपंचेंद्रियनामाध्यायः॥ ॥१
अथनक्षत्रसंयोगोयेनव्याधिःप्रजायते॥ साध्यासाध्यंचजाप्यंचवक्ष्यामिशृणुपुत्रक॥ आदित्ययोगेनम
घाविशाखाचंद्रेणयुक्ताकुजआर्द्रयाश्च॥ मूलेनसोम्योगुरुकृत्तिकाचशुक्रेणरोहिण्यसितेनहस्तः॥ येते
वदंतिनिपुणायमंचयोगंव्याधिप्रपन्नमनुजायदिपुण्ययोगात्॥ जीवेद्यदाकथमसौयमदंष्टयात्रात्
चौरांतरालपतितेनकथंसुखंस्यात्॥ आदित्यनुराधावादंतिहिमरुचिश्चोत्तरासंप्रयुक्तोबुधर्क्षे २

मोवाभाशयुक्तोरतितुरगीयुक्तमेतत्सुखंनः॥ यस्याजीवेनयुक्तोमृगशिरसिनौश्लेषयासूर्यसूनुःसंयुक्तो
हस्तसंज्ञेनवदंतिशुभंशास्त्रविद्योगयुक्तः॥ इतिमृत्युयोगयुक्तः॥ इतिमृत्युयोगः॥ दिनकरकरयुक्तसो
मसौम्येनवापितुरगसहितक्षोमनःसोमपुत्रानुराधा॥ सुरगुरुरपिपुष्येरेवतीशुक्रघारेदिनकरसुतयुक्तो
रोहिणीसौख्ययुक्तः॥ इत्यमृतयोगः॥ ॥ मूलेवज्रेतिगंडेवाव्याघातेव्यतिपातिके॥ विष्कंभयोगयुक्तेन
नक्षत्रेक्रूरदेवते॥ एतैरसाध्याज्वरिणःतस्माद्योगान्परिक्षयेत्॥ योगेरुक्षेतथाबारेक्रूरैर्यातेनजीव
ति॥ इतिक्रूरयोगः॥ ॥ सिद्धिमुकुंभप्रीतिशिवायुष्मान्सुकर्मणः॥ धृतिर्हर्षेध्रुवोहर्षेसुखसाध्याइ
स्मृताः॥ साध्यसौभाग्यवरियान्वैधृतिश्चहलवासवः॥ परिघोवैधृतिश्चैवकष्टसाध्यइतिस्मृताः॥ इति
योगविज्ञानं॥ मघाविशाखाभरणीतथार्द्रामूलंतथाकृत्तिकाहस्तरुक्षं॥ एतानक्षत्रान्मुनयोवदंतिवारक्ष
मेणैवपरीक्षणीयं॥ ॥ मघाभरणीहस्तेषुमूलेवाज्वरितोपिये॥ मृत्युमापद्यतेसोपिनात्रकार्याविचारणा॥
अश्विनारोहिणीपुष्यमृगज्येष्ठापुनर्वसु॥ एतेसाध्यास्तुविज्ञेयाज्वरिणांचविशेषतः॥ पूर्वात्रयेस्वाति
तथैवचित्रात्रयोत्तराश्रवणंधनिष्ठा॥ मूलंविशाखासहकृत्तिकायासर्पेनुराधासहज्येष्ठयावा॥ ए
तेसकष्टरुजपीडितानांरक्षास्तुतत्तिनरंचजाप्यं॥ तस्मात्तुविज्ञायबुधैस्तुसम्यक्रुजांविनाशं

आर्द्रे० प्रतिकर्म मेव॥ अश्विन्यां चैकरात्रंतु भरण्यां मृत्युमिच्छति॥ कृत्तिकानवरात्रंतु रोहिण्यां तु दिनत्रयं॥ मृगेनवसंहिता
कुपाडास्याद्दार्द्रयां मृत्युरेवच॥ पुनर्वसुचपुष्येचसप्तरात्रंतुपूजितं॥ नवरात्रंतथाश्लेषा मघाचैतिय
मारुद्यं॥ पूर्वाफाल्गुनि द्वयंज्ञेयंउत्तरापंचकत्रयं॥ पूर्वात्रयाणांत्र्यंशा शुभाज्ञेयामनिषिभिः॥ एतेषां
मूर्यकेचांशेयदिरोगस्तथामृतिः॥ हस्तेनप्राप्यतेसौख्यंचित्रापंचदशाहनि॥ स्वातीषोडशरात्रंचवि
शाखावाविंशरात्रकं॥ अनुराधापक्षमेकंज्येष्टादशदिनानिच॥ मूलेनमृत्युमाप्नोतिआषाढास्तुत्रिपंच
कं॥ उत्तराविंशरात्रेणश्रुतिमासद्वयंरुजं॥ मासद्वयंधनीष्ठास्यात्सप्तर्षिदिनविंशति॥ नवरात्रंभवेत्पूर्वा
उत्तरापंचकत्रयं॥ दशाहंरेवतीपीडा मुच्यतेव्याधिभिर्नरः॥ कृत्तिकासुज्वरस्त्रीणांव्याधिर्भवति
पैत्तिकः॥ दिनानिदशप्रथमेचरणेचविनिर्दिशेत्॥ दशैवद्वितीयेभागेतृतीयेभागेपंचकं॥ रोहिण्या न
नवरात्रंतु प्रथमांशेप्रकीर्तितं॥ द्वितीयेद्विगुणंप्रोक्तंतृतीयेदशरात्रकं॥ नक्षत्रेचंद्रदैवत्येसप्ताहंप्र
थमांशके॥ मध्यमांशेतथाविंद्याव्याधिद्वादशरात्रकं॥ तृतीयेमुनिभिः प्रोक्तादिनानांपंचविंशतिः॥
नक्षत्रेरुद्रदैवत्येपक्षंस्याप्रथमांशके॥ द्वादशाहंद्वितीयेचतृतीयेंशेनजीवति॥४॥ पुनर्वसोज्व
रंविद्याप्रथमांशेत्रिपक्षकं॥ मध्यमेदिवसान्सप्तान्तृतीयेपंचविंशतिः॥ पुष्येस्यात्प्रथमेसप्त २५

द्विकेविंशतिवासरं॥ तृतीयांशेतथाविद्यात्दिवसानेकविंशतिः॥ आश्लेषाख्येचनक्षत्रेयस्यसंभवतिज्वरः॥ मा
सत्रयेणप्रथमांशेकष्टाज्जीवतिमानुषः॥ द्वयेचतृतीयेमृत्युरेवनसंशयः॥ नक्षत्रेपितृदैवत्येरोगोयस्यप्रद
श्यते॥ प्रथमांशेसप्तरात्रंद्वितीयेधिरम्यतुल्यता॥ त्रिंशत्तृतीयेदिवसानपीड्यतेकर्मणोबलात्॥ नक्षत्रेभग
दैवत्येयस्यसंजायतेज्वरः॥ प्रथमेशेपंचरात्रंमध्येद्वादशवासरान्॥ तृतीयांतेतथाज्ञेयंमृत्युमासादनंर॥
उत्तरायांप्रथमेत्रीणिमासरात्राणिचतुर्दशः॥ द्वितीयेसप्तरात्रंतुतृतीयेदिवसान्नव॥ यदिहस्तेभवेद्रोगप्रथ
मेसप्तरात्रकं॥ चत्वार्यहानिद्वितीयेतृतीयेदिनपंचकं॥ मृत्युमायातथापूर्वेचाश्वेयस्यभवेज्वरः॥ त्रीन्मा
सान्द्वितीयेचांशेरोगोभवतिदारुणः॥ चित्रानाम्नावाद्यांशेसप्तदशाद्वितीयेचैकविंशतिः॥ अस्यैवतृत
तीयांशेमृत्युरेवविनिर्दिशेत्॥ प्रथमांशेविशाखायांत्रिगुणाःषोडशस्मृताः॥ द्वितीयेद्वादशोक्तातृतीयेपितृ रा
क्षसैवच॥ मैत्रेशेप्रथमेसप्तद्वितीयेपक्षमादिशेत्॥ तृतीयेंशेचतुःषष्टिवासरांणांमहामुने॥ त्रिपक्षंमैत्रेप्र
थमेद्वित्रिभागेचषोडशः॥ मूलेंशेतृतीयांशेयंपक्षेमानीषिभिः॥ आद्येपूर्वत्रयोमासामध्यमेहानिषोडश॥
तृतीयेंशेपुनर्मृत्युरतिसारःप्रजायते॥ विश्वेंशेप्रथमेक्षंमद्वयंद्वादशरात्रकं॥ दिनानांविंशतिप्रोक्तातृती
यांशेमहामुने॥ सप्ताहमादौश्रवणेविंशतिर्मध्यमामताः॥ षोडशाहंतृतीयांशेसप्तमेतद्भवीम्यहं॥ विंशति

र्धसवेपूर्वमध्यमासयुग्मकं॥मासत्रजोयोविज्ञेयोदैवज्ञेयोदैवज्ञेश्चनिवेदितं॥वारुणोदारुणोरोगःत्रिप
क्षंप्रथमाशके॥द्वितियेमासषट्कंस्यात्तोऽशाद्दत्रितीयके॥पूर्वभद्रपदायांचदिनाशदशकंपुनः॥मध्ये
तुमरणंब्रूयादंत्येशाविंशतिर्भिर्मिताः॥अहिर्बुध्नेपक्षमादौमध्येमासंविनिर्दिशेत्॥इत्येशाविंशतिर्ज्ञेया
त्रीशास्यात्तापकर्मभिः॥रिवसाप्रथमेचांशेद्वित्रिभागेतुषोऽशः॥दास्तेदशाहंपूर्वांशेमध्येसप्तदशास्तथा॥
अंत्येत्रिंशत्दिनान्येवप्रोक्तंपूर्वसूरिभिः॥भरण्यांप्रथमेचांशेसंवत्सरमेवच॥मध्येमृत्युस्तथांत्येश
रोगोमासत्रयावधिःएवंज्ञात्वासुधीःसम्यक्कुर्याच्छमनक्रियां॥इतिनक्षत्रत्रिभागोज्ञेयः॥
॥अथनक्षत्रहोमोच्यते॥आर्कखदिरपालाशवदर्यपामार्गभद्रकः॥दूर्वाशमीकुशःकाशःपि
प्पलोवटश्चूतकः॥जंबाम्रकरवाटश्चसोमवल्लेकलिद्रुमः॥रक्तसारस्त्वर्जनंचजुयंतीगुरुवृक्षकः॥स
हचरीज्ञातवेयीसर्वौषधिनिशाद्वयं॥समिद्गसमयोपिसमिद्धोमप्रकाशितः॥इतिसमिधः॥॥चंद
नंरक्तचंदनंहरिद्रागैरिकानिंबाबिल्वपतंगकदंबकुंकुममृन्नककस्तूरिकाघनघनसारश्रीपर्णिस
रदारुहरिचंदनपद्मकाकुरिद्राद्वयं॥कालीयकागुरुह्रीबेरपत्रालगोरोचनापलाशमतिगंधानिरे
पद्मबिल्वसुरसादूर्वाकुशकाशजयंतानामीनपत्रकर्कंशुकर्णिकासहचरीपुरुषकपुष्पाणि

कृत्तिकाकांडेतिमंत्रेणपारिभद्रंकदूर्वाकुशकाशसमिद्धीरोहिणीमृगसिरार्द्रापुनर्वस्वादित्यकांडेतत्कांडेतिहोमयेत्॥इमंदे

जंबाम्रपल्लवानिकांचनारपाटलाबदरीअगस्तिकर्कंशुकारीआशोकपुष्पमिति॥धूपदीपाद्यैरर्चये
रैलंकुर्यात्॥वास्तुमंडलंकृत्वाईशान्यादिक्रमेणनक्षत्रमंडलेचार्चयेत्॥तन्मंडलेमध्येआदित्यादीन्यू
हान्समभ्यर्चा॥क्रमेणसमिद्भिर्होमंकुर्यात्॥तस्मात्सुरादधिमधुकृतांसमिद्भिःअश्विन्यादिक्रमेण
जुहुयात्॥आकृष्णेतिअर्कसमित्॥मदश्विन्योर्विल्वराटमसीतिपलाशेनभरणीरंभरण्यांमधुमा
ध्वीषदरिसमित्॥इदंपुष्णायसत्पतेनेमंत्रेणचूतसमित्॥इदंसर्पे॥॥अग्निर्मूर्धादिवेतिजंबुसमित्
मघांहोमयेत्॥सद्योजातेतिकरहाटकसमित्॥पूर्वंहोमयेत्॥तत्पुरुषायविद्महेतिसोमवल्लीसमित्॥उ
उन्नरात्रयंनमोमघोरायचविद्महेतिकर्कंसमित्॥हस्तंहोमयेत्॥नमोज्योतिःपतयेरक्तसारसमित्॥चित्रां
होमयेत्॥नमोदेवायनमोज्येष्ठायेतिचंदनसमित्॥स्वात्यैहोमंकुर्यात्॥उदकेचजयंतीसमित्॥विशाखां
होमयेत्॥हरस्तेतियदतिदक्षसमित्॥अनुराधां॥इदंज्योतिसमित्॥ज्येष्ठांकांउकांडेतिशतावरीस
मित्॥मूलेइदंज्योतिर्निशायुगंपूर्वाषाढांउन्नराषाढांमधुवातेतिउदुंबरसमित्॥श्रवणंत्र्यंबकमिति
बिल्वसमित्॥विश्वान्नूसवितर्दुरितानिहोमयेत्॥घृतेनपूर्णांकुर्तिंदद्यात्॥नवग्रहस्त्वग्नेति॥॥चतु
रस्रेहोमकुंडेहोमयेत्॥तस्मादग्नेकस्नानमाचरेत्॥शुक्लवस्त्रोपवीतेसहितंरोगिणंकृत्वावेदवः

आग्ने॰ दिभिरभिषिंच्य॥ गोभूवस्त्रहिरण्यदानादिकं कुर्यात्॥ इति विधाने कृतेरुक्षांतिर्भवति॥ इति नक्षत्रहोम॥ संहिता विधिः॥ ॥ अथरोगग्रस्तानां दूतलक्षणोच्यते॥ वरवस्त्रपुष्पपूगगुरुफलमतुलंसौख्यकर्त्तारोहिदूताः॥ आगत्यो दिच्यपूर्वायमवरुणदिशामेशमाश्रियशांतोदृष्ट्वावैद्यंविहस्यप्रवदतिनिपुणंरिष्टसर्वंपरिक्षेत्॥ शुभं वाशुभमेववासमासेनप्रवक्ष्यते॥ आतुरोपक्रमार्थायहिदूतोयातिभिषग्गृहे॥ तस्यपरिक्षणंकार्यंयेनसंलक्ष्यतेगदः॥ श्वेताकमूकबधिरोरुजपीडितोवाबालास्त्रियोपिविकलतृषितोविजिर्णा॥ श्रांतोविशीर्णमलसंवृतवाससाचतथैववस्त्रावृतमस्तकेन॥ अश्रुप्लुतेननयनानायुयुक्तःकेशैस्तथामुंडितमेवमन्यत्॥ सात्कर्कशरवोर्द्धशिरोरुहश्चखरवस्तथावामनछिन्ननासा॥ एतान्नरीसंतिविदोमुनींद्राः॥ दूतानराणांनकुलाशामाय॥ यःकर्कशःक्रोधनपाशपाणिःशस्त्रानुरोदिनवचोनुरोति॥ प्रक्षिंननेत्रोगमनोत्सुकोपिवाज्यारुणाक्षोशुभकारिदूतः॥ लकुटोहस्तेवस्यंवक्रपादेनातिगच्छति॥ यस्यदोलस्यवाचादिनेशस्तोवैद्यकर्मसु॥ यश्चागच्छतिशीघ्रेणआविशेत्पुरासमुंचति॥ पादौप्रसार्यविशतिमस्तकेविन्यसेत्करं॥ भिन्नत्तिकाष्ठलोष्ठंचतृणंवाप्यवतेक्षते॥ पततिस्पृशतेनासांस्तनंवास्पृशतेपुनः॥ भूमिलिखतिपादेनरेखांवाकुरुतेयदि॥ निद्रांवाकुरुतेयस्तुसदूतोनिष्टकारकः॥ यःस्वेतवस्त्रावृतःपूर्णपाणिःसंपूर्णतांबूलमुखःप्रदिष्टः॥ ३८

द्विजस्तथामाणवकःसुशीलप्राज्ञोधिकंचाक्षयतेसुखाय॥ कुसुमकुरवस्त्रंपूगतांबूलपत्रंअमलकमलजातं चारुकिंजल्कहस्तं॥ करतलवरवस्त्रंपुष्पपूगंगरोगफलमतुलंसौख्यंहतोहिदूतः॥ आगत्योदीच्यपूर्वायमवरुणदिशामेशमाश्रियशांतोदृष्ट्वावैद्यंविहस्यप्रवदतिनिपुणंनातिनीचंनचोच्चं॥ उक्तिष्टोतिप्रसादंकुरुवनमिदंसौख्यवार्तांतनोतिप्रातःस्वार्थंप्रकटंसुखमगकरेरोगिणांहयलाभं॥ पूर्वादिशिंसमासाद्यप्रशांतःशांतयागिरा॥ वदंतिवैद्यलाभायरोगिणांचसुखावहं॥ यःश्वागत्योपविष्टोपिश्लोकंवाथसुभाषितं॥ वदंतेशोभनावाचासोपिलाभयशांतये॥ योभिवाद्यतिवैद्यस्यक्षेमंसंपृच्छतेपुनः॥ फलंददातिपुष्पंवारोगिणांशुभलग्नतः॥ यस्यसौख्यंसुखंसिद्धिस्तस्यदूताइदंविदुः॥ किमत्रबहुनोक्तेनरम्योदूतःसुखावहः॥ नविषंस्त्रीपुरुषंतस्मात्तेचविवर्जयेत्॥ एवंजानातियोवैद्योंस्तस्यसिद्धिःसुखंश्रियः॥ इतिदूतपरिक्षालक्षणोनामाध्यायः॥ ॥ ॥ ॥ ॥ इदानींनिर्गमेपुत्रप्रवेशेवारहस्यच॥ शुभाशुभानिसर्वाणिवक्ष्यामिशाकुनानिच॥ मातंगवाजिसुरभीसमुद्भोवृषोवारज्यानिबहुप्रतिसन्मुखएवशस्तः॥ मार्गेथवानगरवेश्मनिवेशनेचसौख्यायलाभयशसांप्रतिदर्शयंति॥ राजागजोद्विजमयूरकरंजरीटश्वाषःशकुंतरजकःसितवस्त्रयुक्तः॥ पुत्रान्विताचयुवतीगणिकाचकन्याश्रेयःसुखायययशसांप्रति

आत्रे॰ दर्शयंति। राजायजोदिसमयूरकखंजरीटश्वाषःशंकुवरत्नकःसिवेवस्थायुक्तः॥ लट्वाश्वाघोभासहारीतसंहिता
क्रोभारद्वाजोविकरछोगसंज्ञेः॥ एतेश्रेष्ठादर्शनेसंयमाने वेद्याविद्येयुर्निर्गमेश्रेयसेच॥ सपेचुकोवा
नसूरकरश्यगोधाकक्षःकृकलासाःशशश्च॥ एतेनेष्टानिर्गमेवाप्रवेशेकार्यनिद्यात्रोपकारेषुशस्ता॥
मृगोवापिंगलावापिप्रशस्तादक्षिणासदा॥ निर्गमेवाप्रवेशेवादक्षिणेशुभदायिकः॥ एकोवात्रीणि
वापंचसप्तवानवसंख्यया॥ भाग्यकालेनराणांतुमृगायांतिप्रदक्षिणाः॥ शिखिभवनगोधारासभो
भृंगराजःकपिमूषकपोतोपोतकीसूकरीवा॥ तदनुविहगराजोधूकदीर्घासगस्युःचदतिशकुन
वेलावामतोनिर्गमेपि॥ तित्तिरःकुक्करक्रौंचसारसाभासस्सूकरखगोः॥ कपिराटिवामतःशुभकरान्य
वदंतिनिर्गमेभवंतिकर्मसिद्धये॥ काकोदक्षिणतःश्रेष्ठोनिर्गमेशुभदायकः॥ प्रवेशेगदितःश्रेष्ठो
वामतःकृष्णवायसः॥ जाहकोपिशाचाकोपिहकश्चकीर्तनंनगदितंनशुभाय॥ नैववामचदर्शनमे
षांसर्पगोधिकाकलासबिडालः॥ दर्शनंहितकरंप्रवदंतिखंजरीटमरालशिंकरः॥ नामतःश्रेष्ठकराः के
प्रवदंतिदर्शनाच्चवरदोशकुनश्च॥ इतिशुभाशुभशकुनानि॥ ॥ निर्गमेविबुधैःकार्यसिद्धयेपंच
गराजरजकंपयोजलं॥ मत्स्यमांसरुधिरंमृतंवासमकरंचपिधानं॥ मार्गछेदतिमार्जारंसर्पोवाकृ ३८
धौत

कलासकः॥ गोधावापिप्रवेशेचपदमेकंतुनव्रजेत्॥ प्रसखलनेपादशिरसोवसनानिखलंतिच॥ विकृष्ट
वचनंश्रुत्वानगछेत्सिद्धिमिच्छति॥ ग्रहाणांज्वलनंदृष्ट्वाभियतेसचदंजलं॥ पतंभूनंभूरुहाणांचदृष्ट्वाकु
र्यानचंक्रमं॥ आक्रोशवचनंश्रुत्वामार्जाराणांरुतंततः॥ कलहंगृहलोकस्यदृष्ट्वाचंक्रमणंनच॥ इतिदर्श
नारिष्टानि॥ ॥ ॥ कनककंकणमेवविभूषणेसफलपुष्पमथासववारुणी॥ भृंगमरोगजराजसुभा
षणंशुभकराणिभवंतिशिवंकरासदा॥ इतिशकुनाध्यायः॥ ॥ ॥ ॥ ॥ एवंज्ञात्वापरमनिपु
णोपानमन्नादिकानांवार्यंचैषांगुणमपितथाकोपनंकोपवेगं॥ आदनंवापुनरपिचयंकोपनस्योपचा
रः॥ वैद्योविद्वान्भवतिभुवनेपूजितोराजलोके॥ ॥ इत्यात्रेयभाषितेहारीतेहितीयस्थानंसमाप्तं
॥ ॥ ॥ ॥ ॥ ॥ ॥ अथातःसंप्रवक्ष्यामिरोगसंकरकारणं॥ श्रमात्क्षुद्व्यायामरोधाद्वाचिंता
शोकभयादपि॥ क्रोधादौषधंपीत्वेक्ष्माद्वातोविकोपतः॥ उदर्यकोष्ठादग्निंचरन्कफपित्तंतथाबहिः॥ प
त्वचाश्रितंचसंभूयज्वरंतस्मात्करोतिच॥ उत्क्लेशेतुज्वरोवापिज्वरान्मंदज्वरोभवेत्॥ मंदांतसंतोषै
यतस्मादस्मान्निसेवनात्॥ जायतेकामलातस्माल्लसरूढेस्याद्वलीमुखं॥ हलीमुखोवेपंथुतस्माच्च
क्ष्माप्रकीर्तिताः॥ यक्ष्मासंजातेशोफःशोफादुदरमेवच॥ तस्मादुल्मंचवातार्शोगुल्मप्लीहोथशूल

आत्रेय॥ मंदाग्नित्वं भवेत्तस्मात्स्वरमेदस्तुरोधनं॥ एतेषां सर्वरोगाणां उत्पत्तिस्याक्रमेण च॥ ज्वरेण मृदुविज्ञेयं नमृदु संहितात्युः स्याज्ज्वरं विना॥ शृणुष्वेषज वेदज्ञा द्वितीयरोगसंकरं॥ मंदज्वरेण वै नृणां अतिसारः स्थाज्ज्वरः॥ तेन चापि भवेद्धिक्का शोषो मोहभ्रमोरुचिः॥ एतेषां शोफकया मृदुतीव्रशोफकथ्यते धुना॥ दिवास्वप्नात्तिदोषो वै प्रतिश्यायश्च जायते॥ तस्मात्कासः समुद्दिष्टः कासाद्धानस एव च॥ तस्मात्क्षयः क्षयात्शोफो ज्वरेण पिमृतिं व्रजेत्॥ ज्वरः क्षयश्च यक्ष्मा च कृष्णत्वाशसंग्रहः॥ शर्करामेहमुन्मादमपस्मारं भगंदरं तू॥ एतेमहाघोरतरा व्याधयः कुर्वंति मानवं॥ वातपित्तादयो दोषा यथाश्लेष्मसमुद्भवाः॥ जायंते व्याधयः सर्वे तेषां वक्ष्याम्यनुक्रमं॥ वातस्याधिसप्ताहात्रिरात्रात्पित्तमेव च॥ श्लेष्मासार्धदिनेवापि पैत्तेभिषग्वरः॥ द्वंद्वजं वातपित्तं च त्रिरात्रेण तुपच्यते॥ श्लेष्मवातोद्भवा हेनु पंचाहात्पित्तश्लेष्मकं॥ द्वंद्वजानां च मर्यादा पोचनाशमनानि च॥ त्रिदोषस्य च घोरस्य पाचनं द्वादशेहनि दिने॥ संनिपातं च पचति च तुर्दशादिनैरपि॥ ज्ञात्वा दोषबलं पक्वं तस्माद्देयं च पाचनं॥ सप्ताहेहनिपच्यंते समधातुगतोमलाः॥ निरामश्चयतः प्रोक्तोज्वरः प्रायोष्टमेहनि॥ नवभिः समभिः पश्चान्निरामज्वरकारणं॥ चिरादपिहि पच्यंते संनिपातज्वरेमलाः॥ युक्तं निदानं लक्ष्यते तस्मात्संशमनक्रिया॥ सर्वेषु दोषसाम्येषु पाचे ३९

नं लंघनेस्मृतं॥ लंघितं मध्यलंबि स्यात्अविलंबितमेव च॥ लक्षणं लक्ष्यते चैषां मनुष्याणां शृणुष्व मे॥ इति त्रिविधं लंघनं॥ ॥ गतक्लमोरुजग्लानिरिंद्रियाणां प्रसादता॥ विड्भेदरूक्षनानेत्रेरुचिर्बाधा विड्बंधता॥ मध्यपाकी च दोषस्यान्मध्यलंघितलक्षणं॥ वैड्भ्यं जायते तंद्रा विड्भेदश्चविनिद्रता॥ वेपथुश्चशिरोर्तिश्च क्षुत्क्षामश्लथमेव च॥ शरावास्यप्लवते नेत्रे मूर्छा मोहश्रमातुरं॥ अतिलंघितमेतेश्च लक्षणैस्तं विभावयेत्॥ बालोवृद्धः कृशः क्षीणो ह्यतीसारी व्रणातुरः॥ गर्भिणी सुकुमारश्च नलंघनाया कदाचन॥ इत्यलंघनायं॥ वेलाज्वरेभूतज्वरे तथापित्तज्वरेपि च॥ आयासक्रोधजे चापि मयः कामज्वरेपि च॥ एतेषां लंघनैव कारणायं भिषग्नमः॥ एतेनलंघनायं॥ सामेवेगज्वरेतीव्रे रुचिविड्बंधकेपिवा॥ अजीर्णेचप्रशस्तं तुलंघनं मात्रयान्वितं॥ इतिलंघनयोग्याः॥ ॥ ~~सामेवेगज्वरेतीव्रे रुचिविड्बंधकेपिवा॥ अजीर्णेचप्रशस्तं तुलंघनं मात्रयान्वितं॥ इतिलंघनयोग्याः~~ द्विवारओदनं॥ स्निग्धलंघनातिगात्राणां उदरे गर्जनं भृशं जठरध्मानशिरोर्तिर्हृद्बकुक्षिप्रकूजनं॥ अरुचिः पीतता मूत्रे निद्रातंद्रातुरंतुरं॥ सामज्वरंतु विज्ञेयं लंघनंभिषजोनमः॥ इति सामज्वरे लंघनं मुक्तं॥ क्षुत्क्षामश्रमशैथिल्यभ्रमवेगज्वरातुरं॥ अतदर्हं रक्तमूत्रं निरामज्वरलक्षणं॥ निरामलक्षणं॥ ॥ वातिकोक्तलंघनेषड्रः पाकतोयातिचैवतत्॥

आत्रेय तथैव पाकं तांयाति पैत्तिकस्तुस्त्रिभिर्दिनैः॥ सप्तभिः पाचनेश्लेष्मा दृष्ट्वा लंघनमाचरेत्॥ त्रिदोषोदृश संहिता
रात्रैस्तूपचनेलंघनैर्हिकः॥ दिनैस्तूपंचदशभिःपक्वैत्तेसान्निपातिकः॥ मुंचेद्वामनुजंहंतिभवेद्वा विषमज्वरः॥ आमेरक्तमयादोषाः कफपित्तादनंतरं॥ षोडशेषसमे प्राप्ते त्रिदोषप्रभवागदाः॥ पंचविंशतिमे प्राप्तेज्वरोवैसान्निपातिकः॥ वातपित्तकफैरेवरसरक्तसमुद्भवात्॥ जायतेयोज्वरःसम्यक्तस्यकाथं तुदापयेत्॥ शमनोदीपनश्चैवतर्पणोभेदनस्तथा॥ कल्कोमोहनसंशोधीकाथःसप्तविजानता॥ पूर्वाफेशमनोज्ञेयःपराफेदीपनंस्मृतः॥ संतर्पणभेदनश्च कल्कपानायदापयेत्॥ मोहनोपिप्रभातेचकाथः पानंप्रकीर्तितं॥ रात्रौयत्प्रथमेयामेभूतमेलाप्रकीर्तितः॥ द्वितियंनिद्रानाशार्थंचततःपरंप्र
गुणरात्रंततोज्ञेयं कल्पमप्राहराश्रिनं॥ पूर्वाह्णेचतथामध्यंपराह्णेदिनशेषकं॥ पूर्वेदिनावसानेचभेष
जानामुपक्रमः॥ पाचनोदीपनायश्चशोधनेःशमनःस्मृतः॥ तर्पणःक्लेदनःशोषीकाथःसप्तविधःस्मृतः॥ पाचनोन्मविशोषीस्यात्शोधनोद्वादशांशकः॥ क्लेदनश्चतुरांशश्चशमनाष्टविशेषतः॥ दीपनोयोदशांशस्तुतर्पणश्चसमांशकः॥ विशेषषोडशांशश्चकाथभेदाःप्रकिर्तिताः॥ पाचनःपच्यतेदोषान्दीपनोदीप्यतेबलं॥ शोधनोमलशोधीस्यात्शमनोगदान्॥ तर्पणस्तर्पयेद्धातून्क्लेद

दोहतूक्लेदकारकः॥ विशोषीशोषमाधत्तेतस्मादुक्तोपरीक्षयेत्॥ क्लेदीविशोषीविज्ञायवमनंकारयेत्तरां॥
काथंहतंनलंघनाद्यान्यान्यत्रचालयेत्॥ नस्यप्यःकुसितेस्थानेनाशुचौनचकासिके॥ सचकाथोनशस्तःस्याद्रोगवारणकारणं॥ नशोषयत्पुनःकाथंनचभूमिगतंपुनः॥ दोषसंशमनेनेतेप्रशस्ताःगदकर्मणि॥ विदार्यतेथपतंतेस्फुटतेकाथभोजनं एतेअनिष्टकारास्युःनदोषशमनायच॥ एतैर्विलक्षणेहीनं काथंदृष्ट्वापरीक्षयेत्॥ कृष्णंनालंघनेरक्तंपिच्छिलंश्लथिलंत्रयं॥ दग्धंचकृष्णपंगंधंविश्रंमंधंविवर्जयेत्॥ एतैरसाध्यजानीयाद्रोगिणंनात्रसंशयः॥ इतिद्रव्यगुणान्वर्णान्काथंगंधंविनिर्दिशेत्॥ तद्विद्विद्वंसणंसकायमृतोपमं॥ यातज्वरेलंघनिते दत्वाचान्नंततोपरि॥ निशासुपाचनंदेयं ज्ञात्वादोषबलाबलं॥ त्रिरात्रेपैत्तिकेदेयंश्लेष्मिकेप्रथमेहनि॥ अविज्ञातेचदोषेचपाचनंनप्रदापयेत्॥ पाचनंशमनायंचपाययेत्सप्तमेदिने॥ तच्चनवज्वरेपीतं दोषकृन्हिदोषहृत्॥ तस्मादादौप्रदेयंतुपाचनंचदिनत्रयं॥ शमनीयंप्रदेयंतुपंचरात्रंततःपरं॥ शोधनंदापनीयंच एकरात्रंप्रदापयेत्॥
काथपाने क्लमोमूर्च्छाविकल्पेवाप्रदृश्यते॥ वमनंचतथाप्रोक्तं शमनंपथ्यकेपिवा॥ सदापथ्यंप्रयोक्तव्ये

आत्रे॰ मपथ्योनैवसिध्यति॥ औषध्येनविनापथ्यैःसिध्यतेभिषगोत्तमः॥ विनापथ्यैमसाध्यस्यात् औषधानांशतैः संहिता
रपि॥ ज्वरितोहितमश्नीयात्यदपथ्यारुचिर्भवेत्॥ अन्नकालेथभुंजानःक्षीयतेम्रियतेपिवा॥ सक्षीणेह्य
न्नेयातियान्यसाध्यत्वमेववा॥ तस्मादौक्षेदुलंपुंसोबलेसतिहिजीवितं॥ पंचकोलकसंसिद्धायवागूःसधा
न्यधिते॥ अतिलंघितंतुयंदृष्ट्वातस्यसंतर्पणंहितं॥ आजंदुग्धंगुडोपेतंपानयज्वरशांतये॥ तेनक्रमोविनाश
स्यात्सुखमाशुप्रपद्यते॥ पूर्वमाज्ञामुदीच्यांवासन्मुखमुपवेशयेत्॥ पाययेत्क्वाथपानंचकृत्वाब्राह्मणवाच
नं॥ पानपात्रमधःकृत्वाशयीतोत्तानमेवच॥ पीतेचौषधांतंचनजलंपाययेत्क्षणं॥ गतक्लमंनरंदृष्ट्वातदा
संपद्यतेसुखं॥ इतिश्रीआत्रेयभाषितेहारितोत्तरेज्वरनिदानक्वाथभेदाध्यायः॥ ७॥ ४॥ ॥ ७॥ ॥
यथापललंबीजैस्तुविहतंनिःप्रयोजनं॥ कुर्यान्निपतितोमूर्ध्निरुजोंबासरोत्तमं॥ रसौषधातुरंकुर्यात्तत्तु शी
घ्रकृतमौषधं॥ वरंमाज्ञाविषविषंक्वथितंतोयमेववा॥ पीतमग्निसमंस्याभक्षितान्वाप्यसोगुदान्॥
नतुश्रुतवतांवेषंविभ्रताशरणागतान्॥ गृहीतमन्नपानंवाविचेष्टारोगपीडितान्॥ नदेवयुक्तमेभज्यंयदा
रोग्यायकल्प्यते॥ सचैवभिषजांश्रेष्ठोरोगेभ्योयःप्रमोक्षते॥ तस्मात्सर्वप्रयत्नेनरोगवारणहेतुना॥ युक्ता
निदानलक्ष्यैस्तुसंयुतोपायसंयुताः॥ पठितव्याःसमासेनसंहितानानहेतवः॥ ज्ञात्वारोगपरिज्ञानंत ४१

दाकुर्यात्प्रतिक्रियां॥ अविज्ञायरुजंसम्यक्मोहादारभतेक्रियां॥ विधानज्ञोपशास्त्रज्ञोनसिद्धिंप्रजायते॥
निदानंरोगविज्ञानंभेषजानांगुणागुणं॥ विज्ञायकुरुतेयस्तुतस्यसिद्धिर्नदूरतः॥ आदौचैरुजांज्ञानंसाध्या
साध्यविचक्षणैः॥ याप्यसर्वरुजांचैतत्कुर्यात्प्रतिक्रियां॥ नास्तिरोगोविनादोषोदोषाःवातादयःस्मृताः॥ ष॥
ज्वरादयःस्मृतारोगास्तान्सम्यक्परिलक्षयेत्॥ आप्तःश्रोपदेशेनप्रत्यक्षीकरणेनच॥ अनुपानेनचैवाग्नेः
व्याधिरुजांविज्ञाचिकित्सकः॥ दर्शनःस्पर्शनःप्रश्नैर्व्याधेर्ज्ञानंत्रिधामतं॥ सुखासुखीदर्शनात्स्पर्शनात्सी
तादिप्रश्नवापरं॥ कृच्छ्रयाप्यस्तुयोपायंद्विविधःसाध्यउच्यते॥ याप्याकेचित्प्रकृत्यैवयाप्यासाध्याअसा
ध्यतां॥ तथाघ्नंतिप्राणांश्चसाध्यासाध्यास्तुनराणांमक्रियावतां॥ ज्ञात्वाल्पकेपिभिषगःपरिचिंतनीयानो
पेक्षणीयइतिरोगगणोह्यसह्यः॥ स्वल्पोपिशत्रुविषवह्निसमानरूपःअत्यंबलंनसमतामुपयातिकाले॥
शत्रुस्त्यजेनबलंप्राप्यविक्रमंकुरुतेबली॥ तथाधात्वंतरंप्राप्यविक्रियांकुरुतेगदः॥ बहुविधागदसंधः
कर्मविच्छेदनियाकृत्यमविनाहिधार्यरोगमूलंविधिज्ञैः॥ कथमपिबकुपथेर्व्यरतोवाबलिष्टेनरा
तिगदासोचाल्पमात्रेणसम्यक्॥ यथास्वल्पेविषंतीव्रंयथास्वल्पोभुजंगमः॥ यथास्वल्पंतरश्चाग्नि
थासूक्ष्मोगदोरिपुः॥ योवैचास्थानमाश्रित्यविकारंकुरुतेगदः॥ तावत्तस्यप्रतीकारःस्थानंसाधाबली

आत्रे० यस्मः॥ कर्मजा व्याधयः केचित् दोषजाः संति चापरे॥ सजाः कथिता श्चान्ये व्याधयः स्त्रिविधा मताः॥ बहुभिरूपचा रैस्तु नराः मेयांति ते ततः॥ ते कर्मजाः समुद्दिष्टा व्याधयो दारुणा पुनः॥ दोषजा वातपित्ता द्याः सजाः कृतुदाहृताः॥ यथोक्तानि शास्त्रेभिदं हित्वा तु दोषधर्मशास्त्रमजानतां स्यात्॥ नरा मम तां वृथोपचारैनो हंति रोगं कुरुते च दुःखं॥ तस्माद्दृष्ट्वा मिथ्या दोज्वरमतुलं गदं वाजिनां कुंजराणां मानुष्याणां पशूनां मृगमहिषखरोष्ट्रादि वनस्पतीनां॥ वल्लीनामौषधीनां क्षितिधरकणिनां तृणां मूषकाणां॥ एषां प्राणापहारा ज्वरइति गदितो दुर्निवारो पि लोके॥ आसाध्योयं ज्वरो व्याधिर्गोमहिष्याश्च दारुणः॥ किंचिदूनतरो नृणां अन्येषां जीवघातकः॥ कारणमाह॥ कर्मणा लभते यस्मा द्देवत्वं मानुषो दिवि॥ ततः श्चैवश्च्युतस्वर्गात् मानुष्यमभिवर्तते॥ तस्मात्सदेवभावात्तु सेहंते मानुषो ज्वरं॥ शेषा सर्वे विपद्यंते पशुवर्गज्वरार्दिताः॥ गदोह्येषयमश्चैवनियतिर्मृत्युरेवच॥ अस्मिन्व्यपगतैर्दोषैर्नोजन्मेहपुनरुच्यते॥ रोगाणांरोगराजोयं यथामृगपतिर्मृगे॥ दाघात्मसुर्यथावह्निस्तथारोगज्वरोधिकः॥ तस्मात्तस्यसमुत्पत्तिं वक्ष्यामिशृणुपुत्रक॥ चतुर्विधोमहाघोरो जातो यनतुचाष्टधा॥ दक्षाध्वरप्रमथने कुपितोमहेशः श्वासंसमुत्सृजति तीव्रविधूरसुतंवै॥ रौद्रोज्वरोघनिलमुख्यविकारजातः॥ सोत्यष्टधा जगतिजंतुगणोविदुष्टः॥ वातादिकैकपित्तकफशोणितसंभवानां स्वेच्छान्नपानविगमाद्भुवि वै ४२

परीसात्॥ दोषामलाशयमताजठराग्निमेव संप्रेरयंतिरुधिराश्रितदोषसंघं॥ देहंतनोतिगुरुनामइतिप्रसिद्धः॥ ग्रामाध्यशेनात्क्रोधात्क्षीतसंधारणादपि॥ विरुद्धान्नविशेषेण पापनिर्जरणेन॥ कूपोदकेनदुष्टेनतीव्रश्रुति रश्मिभिः॥ मेघवातेनदोषाणांअभिघातान्निशापतेः॥ ज्वरोनाममहाघोरोजायतेचनृणांभृशं॥ मिथ्याहार विहारश्चदोषाद्यामाशयाश्रयाः॥ बहिर्निरस्कोष्माग्निंज्वरदास्युरसानुगाः॥ स्वेदावरोधः संतापःसर्वांगदा यहृणंतथा॥ युगेपयत्रशेगेतुज्वरइत्युच्यतेतुसः॥ रुणद्धिचाप्यपाधात्नयुस्माज्वरातुरः॥ संभवस्तुछागात्र श्वस्विद्यविनचसर्वेशः॥ जृंभांगमर्दोगुरुतारोमहर्षोरुचिस्तमः॥ अत्रहर्षश्चशांतेश्चभवेत्सुप्तस्यतिज्वरे॥ श्रमोजडत्वंनयनप्लवा स्यादोगोक्रमंमंथरकंचजंभा॥ वैवर्ण्यतादेषसृशोषितास्येज्वरस्यचाव्यक्तकलक्षणानि॥ समारणेतिवै जृंभाकफादनेविषीदति॥ पित्तान्नयनसंतापःसर्ववैसानिपातिके॥ तस्माद्दृष्ट्वेत्रतीकारंयेनसंपद्यतेसुखं॥ पचायवानिधनिकासविश्वंपिबेत्कषायंनिशिसोष्णमेव॥ सपातिकेवातभुवोज्वराणांसंपाचनंस्यान्मनुजेसुखाय॥ निशासनिंबामृतवल्लिकाचधान्यंचविश्वासगुडःकषायः॥ निशासुचक्षीरमिदंसकोलंपानेसपित्तज्वरपाचनाय॥ पचायवानित्रिफलासविश्वाक्वाथोनिशासुकफजेज्वरेवा॥ संपाचनंस्यान्मनुजस्यदो

पिप्पलीमरिचाश्चैवमुनः॥ द्राक्षापर्पटकंतिक्तापथ्यारम्बुधसुस्तकैः॥ काथस्तृष्णाभ्रमिदाघयुक्तः पित्तज्वरापहः॥ विदारिकाराम्रकपित्थकानांस्वान्मातुलिंगस्यचदाडिमानां॥ यथानुलाभेनचतोलुलेपनिर्हरति दाघतृड्मूर्च्छनांच॥ उन्माननस्यप्रसुतस्यकास्यंवाताम्रभाजने॥ नाभानिधायधारांचपित्तदाहनिवारणं॥ रम्याराम्बुकूचभवनतालिंगनंवेष्टसंगात्तु द्राक्षापानंनिगदितामितिपित्तशांतिक्रियाच॥ सुशीतभोजनंमलयजलजासिक्तसंशीतवासामुक्ताहारोविषदूतुहिनोभूत्तद्धोत्तमासुखाय॥ एतैर्हितिदुस्तरसहोमानुषाणांतुपित्तंदाघंश्रोषंक्लमंमपितथातद्भ्रमंमूर्च्छनांच॥ एतैर्योगैर्भवतिनिनरांपित्तदाघस्यशांतिर्योग्याचेषाभवतिभिषजांसाक्रियाश्रमतीच॥ यदिजिह्वागलस्तालुश्रोष्ठौवैमनुजस्यच॥ कोष्ठंमातुलिंगस्यमधुसैंधवसंयुतं॥ संपिष्यतालुलेपनंसद्यःपित्ततृषापहं॥ इतिपित्तज्वरचिकित्सा॥ स्नेहैर्युक्तंमधुरास्यताचजडतांचनिद्राचतंद्राभ्रमंगात्राणांगुरुतारुचाचपटुतारोमोद्गमःशीततः॥ प्रस्वेदःश्रुतिरोधनंचकफजेनेत्रेचपांडुत्वविर्मूत्रंचंदनसन्निभंचवमनंश्लेष्मज्वरंतंविदुः॥ पिप्पल्यादिकफंतुकफजेपाचनंहितं॥ तद्वद्व्याघ्रीचसिंहीचरोध्रकुष्टपटोलकैः॥ ज्वरेकफात्मकेचैतान्

नृपाचनंस्यात्तदुत्तमं॥ दासागुडूचीत्रिफलापटोलंसटीचतिक्तामधुनाकषायं॥ श्लेष्मासमुत्थेषुरुजेषुसम्यक्ज्वरंनिहन्यात्कफजंचशीघ्रं॥ ओमलक्यभयाकृष्णाषड्ग्रंथाचित्रकंतथा॥ मलंपेदिकफासेकज्वरेनाशनदीपनः॥ पिप्पलीशृंगवेरंचषड्ग्रंथाचित्रकंफलंक्काथोमधुप्रगादेयात्श्लेष्मज्वरविनाशकृत्॥ क्षौद्रेणपिप्पलीचूर्णंलेह्याश्लेष्मज्वरापहं॥ घृताहानाहविबंधातिकासश्वासविमर्दनं॥ इतिश्लेष्मज्वरनिदानं॥ नृत्यामूर्ध्वविमथुकटुकंचाननंरूक्षताचअंतर्दाहोवदननयनेपीतताकंठशोषः॥ निद्रानाशःश्वसनशिरसोरुग्भेदोंगभंगोरोमोर्द्धर्षतमकइतिचेद्वातपित्तज्वरस्यात्॥ ससुदोषेविहितंचसम्यक्विपाचनंपित्तमरुज्वरेषु॥१॥ फलत्रिकंराल्लालिसंप्रयुक्तंरास्नाशिवाशृंकराकषायः॥ द्विपंचमूलासहनागरेणगुडूचिभूनिंबसघनैःसमेता॥ कल्कःप्रशस्तःसगुडोमरुत्कफपित्तास्रगतिज्वरनाशहेतुः॥१॥ किराततिक्तामलकीसदीचद्राक्षेषणानागरकामृतानां॥ काथस्तुशीतोगुडसंयुतस्तासपित्तवातज्वरनाशहेतुः॥ मसुरिकावाचनकाचपथ्याद्राक्षेषणाचिन्नरुहाचरास्ना॥ सन्नायमाणःकथितोपियोज्योमरुत्सपित्तज्वरनाशकारी॥१॥ अमृतामुस्तकवासापर्पटविश्वाजलेननिःक्वथ्यपाच

चनं पित्तमरूस्यात्तुज्वरं निहन्यात्तं चभद्रमिदं ॥ इतिवातपित्तज्वरचिकित्सा ॥ निद्रागौरवसंधिशिरःसंहिता
सश्वासतिस्तथा पार्वणभेदोमध्यमवेगमत्रनयनेश्वासान्विते श्लेष्मणः ॥ संतापःश्वसनंरुजःश्रुतिपथेकं
ठकश्चशूकाहृतःस्तंद्रामोहमरोचकंभ्रममथश्लेष्मान्विते पित्तजे ॥ १ ॥ पाठामृणालोदीच्यस्तृक्काथःपि
त्तकफज्वरे ॥ पाचनोदीपनोयस्याद्वक्त्रशोषनिवारणं ॥ १ ॥ क्षुद्रामृतावासकतिक्तकाश्वभूनिंबतिक्तेंद्र
यवाःपटोलं ॥ मुस्तासभांगरिष्टकथितःकषायःपित्तान्वितःश्लेष्मज्वरनाशनाय ॥ १ ॥ गुडूचिकारिष्टबला
निशुंगीकुस्तंबरुचंदनानि ॥ क्काथंविदध्यात्कफपित्तजातेज्वरेविदध्यात्तुगुडूचिकायाः ॥ एषसर्वज्वरा
णांचहृच्छूलादीनरोचकान् ॥ प्रतिश्यायपिपासाघ्नःशोषदाघनिवारणः ॥ [illegible] ॥ निबलकु
वासकंचसटीकिरातंमगधाबृहत्यौ ॥ दार्वीपटोलीकथितंकषायंपिबेन्नरःपित्तकफज्वरेच ॥ १ ॥ पटो
लंचदर्वीतिक्तामूर्वापाठामृतागणः ॥ पित्तश्लेष्मज्वरंछर्दिदाहंकंडूनिवारणं ॥ १ ॥ पटोलवासापिचुम
र्कस्यदलानियष्टीमधुकंबलाच ॥ कषायमेतैःप्रतिसाधितस्तुज्वरेकफेपित्तयुतेप्रशस्तः ॥ संदीपनो
वातकफामकेचतथैवपित्तास्रगसंभवेच ॥ ज्वरेमलानांप्रतिभेदनस्यात्पटोलधान्यामृतकल्पशस्तः ॥ ४५

इतिश्लेष्मपित्तज्वरचिकित्सा ॥ शीतंवेपथुपर्वभंगवमथुर्गात्रेज्वरंत्वैरुजांमंदोग्निरुचिर्बंधनंपरुषताकास
स्तंभःशूलवान् ॥ तंद्राकूजनमास्यगोल्यमथवामदाग्निजंभारुजः ॥ प्रस्वेदोमलमूत्ररोधसहितःस्याश्ले
ष्मवातोज्वरः ॥ औरभ्रंधान्यंतिक्तकरोहिणिचहरीतकीपिप्पलीमूलमुस्ताः ॥ निःक्काथकल्कंकफवातयुक्ते
ज्वरेसशूलेपिहिदीपनोयं ॥ आरोग्यपंचकं ॥ ॥ मुस्तागुडूचीसहनागरेणवासाजलंपर्पटकंचपथ्या ॥
क्षुद्रांचदुस्पर्शःयुतःकषायःपानोहितोवातकफज्वरस्य ॥ १ ॥ क्षुद्रामृतापुष्करनागराक्यैःकृतःकषा
यःकफमारुतोत्तरे ॥ सश्वासकासारुचिपार्श्वरुग्ज्वरेत्रिदोषप्रभवेप्रशस्यते ॥ इतिक्षुद्रोद्यपाचनं ॥ ॥
द्विपंचमूलक्काथःकणाचूर्णेनसंयुतः ॥ देयोवातकफेशूलज्वरेश्वासेचपानके ॥ इतिवातकफज्वरचिकि
त्सा ॥ ॥ तंद्रालस्यंमुखमधुरतागलवनंकंठशोषनिद्रानाशःश्वसनविकलोमूर्छनाद्वेषताच ॥ जिह्वा
जाड्यंपरुषमथवापृथुलशीर्णंयथास्यादंतदाहोभवतियदिवाविद्धिद्वंद्वंत्रिदोषं ॥ इतित्रिदोषलक्षणा
नि ॥ ॥ दृष्ट्वात्रिदोषजंघोरंज्वरंप्राणापहारकं ॥ तस्मादादौकफस्यास्यशोषणंपरिकीर्तितं ॥ नकुर्या
च्चित्रसंशमनंयदिचेद्दोषलोपशः ॥ कफोवातस्यबलवान्सद्योहंतिरुजातुरं ॥ लघनंवमनंचापिशीलनं ॥

आत्रे० स्यात्रिदोषजे॥ त्रिरात्रंपंचरात्रंवासप्ताहद्वादशमेथवा॥ लघनंचसमुद्दिष्टंज्ञात्वादेहबलाबलं॥ कफंविशोषितं संहिता
ज्ञात्वातनोवातनिवारणं॥ पित्तस्यशमनंकार्यंज्ञात्वापित्तस्यकोपनं॥ शोषणंयोवातकफोनतुपित्तंविनाशये
त्॥ इतित्रिदोषचिकित्सा॥ ॥ तृष्णास्फुलशोषश्वसनमथविशा जागरंवासरेस्याद्भ्रमोहश्चशोषोभवति त
वदनेघ्राणजिह्वाधराणांरक्तनिष्ठीवतेयोभवतिकुरातनोमूलानांचरूप॥ संभूतिःस्याद्वनेत्राधरवदनम
थास्वेदमाध्मानभावक्षुन्नाशोहिसौख्यंभ्रमइतिशिरसालोटनंमूत्रेनावा॥ श्रोतोरोधोबमिवागलक
घुर्घुराश्रूकलेर्वादितस्त्वएतैर्लिंगैप्रयुक्तःप्रसभमथनृणांसंनिपातेविसंज्ञा॥ रागाणांकृच्छ्रसाध्यःप्रब
लतरनृणांवाजिनांवाद्विपानां॥ इतिसंनिपातज्वरलक्षणं॥ संनिपातज्वरेपूर्वंकुर्यादामकफापहं॥
पश्चाश्लेष्मणिसंक्षीणेनिरयेसितमारुतौ॥ संनिपातज्वरेपूर्वंकृत्वानंद्रीजयेत्सुरं॥ उपद्रवःकफस्तत्रभेष
राणांसविशेषतः॥ पथ्यंकारयतेयस्तुरोगिणंकफदूषितं॥ सएवतस्यशत्रूस्यान्नपथ्यंनचभेषजं॥ स
टिद्विपंचमूलकंटुरालभ्रंसकोट्टजं॥ पटोलपौष्करंतथायुतःसभार्गीपिप्पली॥ समानमेवसंनिहंतिसा
न्निपातकज्वरं॥ दशांगसंज्ञकः॥ ॥ इतिदशांगोनामगंथः॥ भूनिंबशारुदशमूलमहौषधाद्वृतिक्तं क्वो
द्रबीजधनिकेभकणाकषायः॥ तंद्रालापकसनारुचिदाहमोहश्वासाद्विपुक्तमखिलज्वरमाशुहंति॥

शुंठीकणागजकणासुरदारुधान्यातिक्ताकलिंगदशमूलसमोपिकल्कः॥ श्रेष्ठस्त्रिदोषजनिज्वरनाशनायश्वा
सभ्रमारुचिविबंधहृदामयघ्नः॥१॥ मुस्तोशीरनिशाविशालमधुकंपाठाबलारोहिणीनीलीधन्वयवासवा
सकसटीशुंटिसमंगात्रिवृत्॥ यष्टीपिप्पलीमूलपर्पटफलाकंपिल्लकंदारुचव्यामाहेमगुडूचिकासमपु
यःक्वाथोज्वरंनाशयेत्॥ द्वौहृतौसोसटीशृंगावत्सकंकटुरोहिणी॥ पटोलंपौष्करंभार्गीवासकंसटुरालभं॥
एषोहृत्प्लीहादिकृपाचनःस्यात्॥ कासादिकोपद्रवनाशनश्च॥ शीघ्रंनिहंतिज्वरसंनिपातेशूलार्तितंद्राश्व
सनःप्रशस्तः॥ हृत्प्लीहापाचनं॥ सप्तकिरातंकटुकाविशालागुडूचीशृंगाहरीतकीद्वयंच॥ महौषधंपौष्करध
न्वयासंरास्नासुराकंगजपिप्पलीच॥ शस्तश्चनिःक्वाथ्यहितोज्वराणांससुंठ्यादिचातुर्दशकःप्रशस्तः॥
हिनस्तितंद्राश्वसनंशिरोर्तिजाड्यंसशूलंज्वरमाशुहंति॥ सूच्यादिपाचनं॥ भूनिंबसुरदारुनागरघना
तिक्ताकलिंगानिचधान्यंहस्तिकणाद्विपंचकगुणोयुक्तःकषायोहितः॥ सर्वासांचरुजांविनाशनकरःस्या
त्सन्निपातज्वरंहंतिश्वासविशेषवक्ष्यसिरुजांतंद्राहिनास्तिद्रुतं॥ रास्नागुडूचीघनपर्पटकंपटोलंभूनिंब
वत्सकसटीयुतनागराणां॥ तिक्तासुराकंगजमागधिकायवासाबलागजबलाकथितःसमंशैः॥क्वा
थोनिहंतिमरुतःप्रभवामयानांसश्वासकासजठरार्तिविसूचिकानां॥ श्रोतोनृणांभवतिदारुणसंन्नि

आत्रे० तेरोगेथवा कफसमारणे प्रदेयः॥ दृहद्रास्नादि॥ रास्नात्रिकंटशतपर्वमहौषधानांभागस्पो ऽघनासु सांहत्या रसारूधान्यं॥ क्वाथोहितः सकलमारुतजेज्वरेषुस्यात्सन्निपातप्रभवेष्वतिदारुणेषु॥ ॥लघुरास्नादि॥॥ त्रिदृद्विशालोत्रिफलासुराकुमारग्वधंतिक्तकरोणीच क्वाथोभवेद्दृनकोमलानांस्याद्यावशूकेनयुतोज्वरघ्नः॥ त्रिदृतादिमलभेदने॥॥ इदानिसंनिपातेअश्वेदोद्दलकंकथ्यते॥॥ वचायवानीचमहौषधंचस्वेदेनचूर्णंनतुलेपनाय॥ रास्नंवदंतिज्वरघर्मशांतिकरोतिनूनंपरिमर्दनेन॥ ॥मागधिसुरतरुसविश्वकंतिक्तोचदीप्यकयुतंतनुलेपनाय॥ चूर्णंप्रशस्तमपिवारयतेशरीरस्वेदंचशीतलतनुत्वमथासुनूनं॥ इतिउद्दलकानि॥ ॥मधूकसारसमहौषधेनक्वोष्णासैंधवसंयुतेन॥ सूत्रेणवाचोत्पजलेनपिष्टान्हृद्यविसंज्ञप्रतिबोधनाय॥ सोभ्राजनकमूलस्यरसंचमरिचान्वितं॥ विसंज्ञितानांनस्यस्याबोधनंचाशुरोगिणां॥ इतिनस्यविधानं॥ एकंदृहत्फलपिप्पलीकंशुंठीयुतंचूर्णमिदंप्रशस्तं॥ प्रधार्यघ्राणपुटेविसंज्ञाचेष्टाकरोतिक्षवथुंप्रबोधं॥ प्रथमबोधनविधि॥ शिरषबीजंमरिचोपकुल्योसूत्रेणघृष्टंसहसैंधवेन॥ तेनांजनंस्यान्नयनेनराणांविनष्टसंज्ञांप्रकरोतिचेतः॥ इतिनेत्रांजनविधिः॥ ॥त्रिकटुकरंजबीजंत्रिफलासुरदारुसैंधवसुरसा॥ वर्तिर्नयनांजनकंतंद्रानाशंकरोतिमनुजानां॥ अंजनविधिः॥ ॥ ४७

केसरंमातुलिंगस्यशृंगवेरंससैंधवं॥ त्रिकटुंसैंधवंकृत्वाआकंठंधारयेन्मुखे॥ दंतजिह्वामुखंतालुघर्षणंकारयेत्सुधीः॥ कारयेच्चीवनंसर्वंवारंवारंविधानतः॥ तेनकंठविशुद्धिस्यात्प्लुतेघ्राणेचापकर्षति॥ जिह्वापटुत्वरुचिर्ह्लासस्यासौप्रशाम्यति॥ त्रिकटुकचविकापथ्याचूर्णंसैंधवसंयुतं॥ तेनदंतास्थाजिह्वाघर्षणेनश्लेष्मलान्तू॥ निष्ठीवनंगलोत्सुद्धिरुचिहृत्कफसूदनं॥ हृल्लासनाशमाप्नोतिपटुत्वंकुरुतेभृशं॥ ॥इतिचीवनयोगः॥ यदिवाशीतलागात्रेतदास्वेदोविधीयते॥ स्वेदात्रयोदशज्ञेयाःस्वेदवारणकारणः॥ शूकरप्रसूनोनाडीपरिशेकावगाहनं॥ जलाकोष्णघनद्रव्यैःकुंभीभूःकुंभिरेववा॥ कूपोहोलाकइत्येतेस्वेदयंतित्रयोदशा॥ त्रयोदशास्वेदाः॥ ॥अथस्वेदाःप्रवक्ष्यंतेयेयथाचप्रयोजितैः॥ स्वेदसाध्याप्रशाम्यंतितदावातकफोल्बणाः॥ स्नेहपूर्वंप्रयुक्तेनस्वेदिनावर्जितेनिले॥ पूरीषमूत्रयोर्नासिनसज्जंतिकदाचन॥ शुष्कान्यापिचकाष्ठानिस्नेहस्वेदोपजायते॥ नमयंतियथान्यायोकिंपुर्नजरवोनरान्॥ शीतस्तब्धव्यपरमेस्तंभगौरवनिग्रहे॥ संजायतेमार्दवंगानांविरामस्वेदनाद्धितः॥ पित्तप्रकोपोमूर्छाचगात्रस्तेषोस्तृषाकुलः॥ दाहःस्वरांगदौर्बल्यंअतिस्विन्नंप्रजायते॥ रूक्षाणांमद्यनित्यानांगर्भिणीरक्तपित्तिनां॥॥ पित्तानांसातिसाराणांरूक्षाणांमधुमेहिनां॥ विदग्धधातुधात्वानांविषमद्यविकारिणां॥ दुर्बलातिविशुष्कानांउपक्षीणौजसांतथा॥

आत्रे भिषक्शिरीकार्णा च नस्वेदमेवचारयेत्॥ इतिअस्वेदनीयः॥ प्रतिश्यायचकासेच हिक्काश्वासेचलाघवे॥ संहिता
कर्णमुन्यशिरःशूलेस्वरभेदगलग्रहे॥ अर्दितेकाग सर्वांगपक्षघातेविनामके॥ कोष्ठनाहविबंधेषुप
क्षघातेविजृंभके॥ पार्श्वपृष्ठकटीकुक्षीसंग्रहगृध्रसासुच॥ मूत्रकृच्छ्रेमहत्वेचशुक्रयेगामुदर्के॥ पादोरु
जानुजंघातिसंग्रहेश्वयथावपि॥ खलीवामेचवृद्धीनेचैवपथुवातकंटके॥ संकोचमामशूलेमुस्तंभगौरव
सुप्तिषु॥ सर्वेषिवातिकारोगेषुस्वेदनंहितमुच्यते॥ इतियोग्याः॥ ॥ फलेस्वेदघटीस्वेदवालुकास्वेदमेवच॥
कारयेदुक्तथाद्भ्यांतथाशिरसिचातुरे॥ एवंनशांतिर्यदिवादहेद्धोहस्तालकया॥ पार्श्विदग्धेनचोच्छ्वा
सेतनूदहेच्चांगुष्ठशूलके॥ तथाचमणिबंधेतुहृदिमूर्ध्नितथापिवा॥ स्वेदोललाटेहिमवान्नरस्यशीतादि
तस्यातिसुपिच्छलस्याकंटस्थितोयस्यनयातिवक्त्रे॥ नूनंयमस्येतिगृहंसमर्द्दः॥ पवनेकफयुतेवापि
नमंतज्वरस्यादिवसदशमनुष्योसप्तकेद्वादशेवा॥ भवतिहिमरणंवामोचनंवायमस्यद्रुतेतरमपिमेतला
रणंवैत्रिदोषे॥ सप्ताहेवादशाहेवाद्वादशाहेथवापुनः॥ त्रयोदशःपंचदशेप्रयाशमंयातिहंतिवा॥ अथ
पंचदशाहेवाहंतिरक्षतिमानवं॥ संनिपातंमहाघोरंज्वरंकालाग्निसंनिभं॥ एषात्रिदोषमुर्यादामो
क्षायचवधायच॥ संनिपातस्यदोषस्य घोरस्यास्यभिषग्वरः॥ संनिपातेतदीहे मनुजयः सित४८

वारिणासिंचेत्॥ आतुरःकथमपिजावेत्वैद्यश्चासोकथंपूज्यः॥ यःसंनिपातजलधौपतितंमनुष्यंवैद्यःस
मुद्धरतिकिंनलेतंचतेन॥ धर्मिणावायशासानचकःप्रशस्यःपूजांनकोभुविलभेच्चभवेत्सवैद्यः॥ इति
संनिपातज्वरचिकित्सा॥ ॥ वातपित्तकफात्रीणियुगपद्देहत्रिदोषजं॥ तंत्रिरूपेनसंयुक्तोज्वरःस्यात्सं
पातिकः॥ नरूपेनविनावृद्धिज्वरोवैसांनिपातिकः॥ क्वाथःपाचनकैर्दोषाःप्रशमंयांतिमानवे॥ तस्मा
त्प्रशमितेदोषेरूपंनैवविलीयते॥ तेनैवजायतेरोगःकर्णमूलेसुदारुणः॥ तस्मात्तस्यप्रतिकारंकुर्याद्र
क्तावसेचनं॥ अंगारधूमेरजनासहौषधैर्नसिद्धार्थसैंधववचापयसानिपिष्या॥ लेपोहितोरुधि
रनाशकरप्रतितः॥ शोफव्रणस्यशमनंमनुजस्यकर्णे॥ जलौकालांबुशृंगौस्रुतःस्यात्लेपनंहितं॥ बी
जपूरकमूलानिअग्निमंथस्तथैवच॥ आलोचयमिंद्रवारुणस्यकर्णमूलस्यनाशनं॥ यदापाकोभवेत्तस्या
कार्यावैषाप्रतिक्रिया॥ धवार्जुनकदंबवकूलेपनंव्रणरोहणं॥ निंबारग्वधमूलानिनिशायुक्तंप्रलेप
नं॥ धावनंपूयग्रंथीनांरोहणंस्याद्व्रणेषुच॥ वर्जयेच्चदिवास्वप्नंयोषित्संगंबहूदकं॥ जलशीतनि
शाजागर्यव्यायामशोचनंतथा॥ माषाश्चयवगोधूमतिलपिष्टाकमेवच॥ सप्तरात्रिंपुनश्चैवतेलंचदूर
तस्यजेत्॥ मांसमेकंव्यवायंचपक्षैकंचातिभोजनं॥ वर्जयेत्कर्णमूलेपिसुखंतेनोपपद्यते॥ षष्ठिको

आत्रे॰ नुपुराणांवाचाल्यंसपित्तथाढकी॥ कुलित्थमुद्गयूषंवाभोजनेतिप्रशस्यते॥आर्द्रार्द्रंतंडुलीयंचशालपुष्पापटो संहिता
लकं॥ कोशातकीद्वयंचापिकूष्मांडानिसुभानिच॥ वार्ताकश्चपलांडुंच कंदशाकान्परित्यजेत्॥ एतेनसुख
मामोतिशीघ्ररोगात्प्रमुच्यते॥ इतिकर्णमूलः॥ ॥अंतःपित्तंयदातिष्ठेद्बाह्यश्लेष्मासमीरणे॥तदांत
र्दाहशोषस्यबाह्येदस्वेदशीतताः॥ तस्मादावमृताकर्थंपिप्पलिमधुसंयुतं॥पाययेद्वाक्षीरंशीतया
गुडशीतुलं॥अथवातिविषावारिनागरंवाथमपर्पटं॥क्काथोवाशर्करायुक्तंअंतर्दाहोपशांतये॥बाह्येपित्तं
यदातिष्ठेदंतर्वीकफमारुतौ॥तेनोष्मत्वंशरीरस्यअंतःशीतंप्रजायते॥तस्यषष्ठादिकंक्काथंप्रयुंजीया
त्लणादिकं॥द्वावेतौदाहशीतादीन्ज्वरौसंसर्गजोस्मृतौ॥दाहःपूर्वतयोःकष्टकृच्छ्रसाध्यश्चसस्मृतः॥
श्लेष्मपित्तविदाह्येतेरसरक्तेयदानिलः॥तस्मिन्कालेमनुष्याणांजायतेविषमोज्वरः॥ कफवातौसमौ
यस्यहीनपित्तस्यदेहिनः॥तीव्रोवायदिवामंदोजायतेरात्रिकोज्वरः॥वेगंकृत्वाविषंयद्वदशुसंली
यतेबलं॥कुप्यतेप्रबलंभूयःकालेदोषविषंतथा॥वेगहानौप्रशाम्येतत्पथाभःसागरेतथा॥दो
षवेगोदमेतद्वत्तदोर्यतिज्वरोहिसः॥श्लेष्मप्रायस्तुपूर्वाह्णेप्रदोषेचप्रवर्तते॥अपरान्हेनिलप्रायः
प्रदूषस्यापिवर्धते॥ कफपित्तोविचेष्टेवेष्टयेत्सनिलःसदा॥तस्मादेवानिलाद्रोगाःसंभवंतिज्वरास्तथा॥

यः॥हीनमध्यादिकेदोषैस्त्रिसप्तदशाहिकः॥ज्वरवेगोभवेत्तीव्रोयथापूर्वंसुखप्रियः॥जार्णज्वरेरुचिकरंदध्या
क्षीणविरेचनं॥सप्तनंविषमंवापिक्षीणस्यसुचिरोत्थितं॥ज्वरसंशोधनैःपथ्यैःज्वरघ्नैःसमुपाचरेत्॥तंडुली
यवास्तुकषालमूलकपर्पटान्॥ज्वरक्षीणस्यहितंवमनंनविरेचनं॥ कामंतुपयसीतस्यनिरूहेर्वा
मयेभृशान्॥अरोचकेगात्रसादेवैष्यिंगमलादिषु॥शीतज्वरेपित्तोध्यस्यादनुबंधभयंभरः॥द्रव्येष्ट
गुणंक्षीरंक्षीरात्तोयंचनुगुणं॥क्षीरावशेषंकर्तव्यंक्षीरपाकेविधिस्त्वयं॥कासाछ्वासांनिलाष्ठीलाश्लि
रोरोगात्सपीनसात्॥मुच्यतेज्वरितःपीत्वापंचमूलीस्तंपयः॥त्रिकंटकबलाव्याघ्रीगुडनागरसाधितं॥
वर्चोमूत्रेत्रिबंधघ्नंशोफज्वरहरंपयः॥कलिंगकापटोलंचपत्रंकटुकरोहिणी॥निंबपटोलंत्रिफलामृद्वि
कामुस्तवत्सकैः॥किरातंतिक्तमृताचंदनंविश्वभेषजं॥गुडूच्यामलकंमुस्तामधूश्लोकसमायुतं॥
कषायःशमयेत्सामंपंचपंचविधंज्वरं॥अजाजीगुडसंयुक्तोविषमज्वरनाशनः॥अग्निसंदीपनस्तस्य
कृमिवातगदांश्चनाशयेत्॥गुडूचिमुस्तधात्रीणांकषायंवासमाक्षिकं॥ कर्मसाधारणंवापिशस्यतेविषमज्वरे॥ पिप्पलीवर्धमानंवापिबेत्क्षीररसासितः॥गंगा

आत्रे॰ या उत्तरे कूले तापसो पुत्रको मृतः ॥ तस्मै तिलोदकं दद्यात् मुंचत्येकाहिको ज्वरः ॥ पलंकसा निंबपत्रं वचा कुष्ठं संहिता
हरीतकी ॥ सर्षपाः सवयाः सर्पिर्धूपनं ज्वरनाशनं ॥ धूपः ॥ मूलं भूमिजयसास्तुसहदेवोऽथवेतथा ॥ तंडुलीय
लि कमूलं वा मूर्ध्निबद्धं ज्वरं जयेत् ॥ इति मूर्धाबद्धा ॥ ॥ विषमज्वरेषु कर्तव्यं मूर्धाअधश्च शोधनं ॥ शांतिनायत्र
हृद्दोषः सक्षौद्रविषमज्वरं ॥ श्रोणीगुरुभराक्रांतांक्षामामध्यांहरुचं ॥ योषितंत्रिभागसंश्लेषेजर्जयेयुः शीत
मुल्बणं ॥ क्वाथाश्चतुर्गुणास्नेहःस्नेहात्तायंचतुर्गुणं ॥ क्वाथश्चतुर्गुणेवारिक्वाथक्वाथसमोमतः ॥ ॥ अ
थधातुगतज्वरलक्षणान्युच्यते ॥ रसस्थेतुज्वरेवत्सलक्षणानि निबोधमे ॥ गुरुस्तंदैन्यमुत्क्लेशः सदनं
छर्दिरोचकः ॥ मूत्राधिक्यंबहुस्वापोगात्रमर्दोविजृंभणं ॥ इतिरसगतज्वरः ॥ ॥ रक्तस्थेवमदाहोमोह
छर्दनविभ्रमः ॥ प्रलापपिंडिकोत्क्लेशरक्तप्रायेज्वरेनरे ॥ इतिरक्तगतज्वरः ॥ ॥ पिंडिकोद्वेष्टनंतृष्णा स्रस्त
मूत्रपुरीषता ॥ उष्मांतर्लेमविक्षेपोग्लानिःस्यान्मांसगेज्वरे ॥ इतिमांसग ॥ ॥ वेगस्तीव्रपिपासाच्च
मूर्च्छाच्छर्दिप्रलापता ॥ गंधस्यवासहत्वंचदेहस्योत्क्लेशनंरुचेः ॥ इतिमेदोगतं ॥ विरेकवमनेचोभेचस्थिभे
दप्रभंजने ॥ विक्षेपःसर्वगात्राणांश्वासश्वास्थिगतेज्वरे ॥ ॥ इतिअस्थिगतं ॥ हिक्काश्वासोमहाका
सःतमसश्चप्रवेशने ॥ तमसिदोषहिःशैत्यंदाहोतश्चैवमध्यगे ॥ इतिमज्जागतज्वरलक्षणं ॥ ॥ ५०

तस्मान्मरणमाप्नोतिशुक्रंचाप्युपसर्पति ॥ शोफश्वासश्चतामोक्षःशुक्रस्थातुविशोषः ॥ इतिशुक्रगतज्वरोसाध्यएव ॥
॥ इतिसप्तधातुगतज्वरलक्षणं ॥ दग्धेधनोयथावह्निधातून्कृत्वायथाविषं ॥ कृतकोवज्जेज्जंतिर्देहंकृत्वा
तथाज्वरः ॥ नजातुस्वापयेल्लाजःसहसाज्वरकर्षितं ॥ तेनसेदूषितोयस्यपुनरेवभवेज्ज्वरः ॥ इतिसंनिपाता
नांमर्यादाः ॥ ॥ संधिगेसन्नजर्माणिअंतकंदशवासराः ॥ स्रस्तदाहोविशतिर्ईषन्निरुद्धंचित्तविभ्रमे ॥ शीता
गेपक्षमेकंचतंद्रिकेपंचविंशतिः ॥ विज्ञेयावासराश्चात्रकंटकुक्षेत्रयोदशः ॥ कर्णकेचत्रयोमासाभग्ननेत्रे
दिनाष्टकं ॥ रक्तक्षीवेदशाहानिचतुर्दशप्रलापके ॥ जिह्वकेषोडशाहानिभिन्नास्येविंशकं ॥ परमायुरिदं
प्रोक्तंम्रियंतेतत्क्षणादपि ॥ इतिसन्निपातानांआयुर्मर्यादा ॥ ॥ द्राक्षाटरूषोदहतोहरिद्राधात्रीभयाचेषु
कृतःकषायः ॥ क्षौद्रेणमिश्रोपिनिहंतिपूर्वंरक्तोद्भवंश्लेष्मयुतज्वरंच ॥ अंगभंगोमुखेश्वासोगात्रस्तैमि
दिरक्तता ॥ तृष्णाशूलंतथाध्मानंरक्तजेज्वरलक्षणं ॥ यस्योर्ध्वगोवातकफोअधोगंपित्तमस्यच ॥ तेनोर्ध्व
जीतलोगात्रमधश्चोष्णंप्रजायते ॥ तस्यरास्नादिकंक्वाथंप्रयुंजीयात्सउच्छ्रितं ॥ यस्योर्ध्वगंरक्तपित्तंमध्ये
वातकफौबुभौ ॥ तेनोर्ध्वंजायतेश्लेष्माअधःशीतंप्रजायते ॥ तस्यक्वाथनागरादियुंजीतविषजोत्तमः ॥ आ
यस्योष्माहृश्यतेचांतेमंदस्तोष्माचजायते ॥ वाह्यंवेगोषजानीयात्ज्वरःसाध्योविजानताः ॥ यस्यांते

जायतेचोष्माहृद्दाघःशिरोव्यथा॥ तृष्णाविकलतायस्यासांतर्वेगोभवेज्वरः॥ यस्याछर्दिसोभवदुष्टोरसंहित
कनेत्रोतिविकलः॥ अंतर्दाघोभवेद्यस्यशरीरंपुलकांकितं॥ मूत्ररक्तेशिरस्यतिप्रलापंभ्रमंभवेच॥ गं
भीरवेगंजानीयात्कष्टसाध्यंनृणामपि॥ तस्यकुर्यात्प्रतिकारंयोग्याश्चदशकान्नृणां॥ अंतेपित्तेयदातिदृ
ष्टेवातकफावुभौ॥ तेनशीतंशरीरस्युच्छ्वेकरपादयोः॥ तस्यरास्नादिकंक्वाथःपेयःपिप्पलीय
तः॥ देहेपित्तंयदातिष्टेचांतेवातकफाउभौ॥ तस्योपजायतेदेहेशीतत्वंकरपादयो॥ तस्यद्राक्षादिकंक्वा
थःदेहःसगुडपाकतः॥ यत्रतत्रभवेच्छैत्यंतत्रस्वेदोविधीयते॥ नास्तुछस्वेदनंकार्यंज्वरस्यास्यविजान
ता॥ भ्रमेनशीतंविकलतांकपोविटुभ्रदनंक्रमः॥ श्रमस्वेदोजलमंनेचज्वरमोक्षोभवंतिच॥ न्यस्वेदकंडूर्व
पुषिशिरस्युर्णकोमुखेपुक्षवथुलघुत्वं॥ अन्नाभिलाषंविमलेंद्रियत्वंगतक्लमोविगतरूक्षमनुष्यः॥ यदीघ्रा
नुगतंतेचज्वरोदेहेप्रपद्यते॥ विषमज्वरमानीयात्तंचज्ञेयंचतुर्विधं॥ एकाह्निकश्चतुर्थिकस्तत्रयान्हि
कोथपरः॥ वेलाज्वरःश्चतुर्थीवि विजानीयाद्विचक्षणः॥ शीतेनपूर्वंभवतियश्चोछ्वासमिच्छति॥ससाध्यो म
नुजःप्रोक्तोशीघ्रंसिध्यतिभेषजैः॥ पश्चादोदाघमान्प्रोतिज्वरोथवतिदारुणः॥ सोपिनोमुच्यतेशीघ्र
ज्वरोधातुक्षयंकरः॥ त्रिकोटकट्यांरुजवातपित्तात्स्यात्तंद्रामस्तकरुक्श्रमश्च॥ पृष्ठेतनुश्चे

मरुजाकरःस्यात्रिधातुतायज्वरलक्षणास्यात्॥ चातुर्थिकोद्विधास्लेष्मालकोज्वरः॥ जघन्यश्लेष्मि
कोज्ञेयोशिरसोनिलसंभवः॥ एवंविज्ञायसद्वैद्यःकुर्यात्तत्रप्रतिक्रियां॥ रसेचेकाहिकुमांसगोपित्तती
यकः॥ चतुर्थोस्थिसमाश्रित्यानत्वज्ञैःपरिलक्ष्येत॥ सर्वधातुगतोज्ञेयोजीर्णधातुक्षयंकरः॥ भुनजेभूत
विधास्याद्बुधोवेद्यानताडनं॥ अभिद्रुतेज्वरोयस्तुतस्यशांतिप्रतिक्रिया॥ कामजेकामनापत्तिःतयो
र्विश्वासनंहितं॥ क्रोधजेपित्तजिल्कार्यासद्वाक्येरूपशामयेत॥ औषधिंबुधजेमूर्छाकषायासेवनाहि
ता॥ निदिग्धिकानागरकामृतानांक्वाथंपिबेन्मिश्रितंपिप्पलीकं॥ जीर्णज्वरारोचककासश्वासाग्नि
मांद्यार्दितपीनसेषु॥ ॥ निदिग्धिकादि॥ ॥ कासाजीर्णश्वासहृत्पांडुरोगेमंदेवाग्नौकामलारोचकेच॥
तेषांशस्तापिप्पलीस्याद्गुडेनहंतिक्षीणंजीर्णमामज्वरंच॥ गुडपिप्पली॥ लघुःपंचमूलीक्वथितःकषाय
श्चिन्नोरुवायसहपिप्पलीनां॥ जीर्णज्वरःश्वासकफामयघ्नोमंदाग्निशूलारुचिपीनसानां॥ पटोलपा
कटुरोहिणीनांफलत्रयंवत्सकनिंबमेघं॥ द्राक्षामृताचंदननागरंवाक्वाथंपुराणज्वरनाशनाय॥ पुराण
ज्वरे॥ ॥ सजीरकंगुडभक्षयेत्सगुडांवाहरीतकीं॥ सगुडान्वातिलान्भक्षयेत्ज्वराणांविषमानुगा॥ गु
डार्द्रकंभक्षयेद्वात्रिफलाक्वाथोगुडेनतु॥ क्वाथेपिविषमाणांतुज्वराणांशीघ्रमेवच॥ १॥ वासाधात्री

आत्रेय० कलादारुपथानागरसाधितः॥ मधुनासंयुतःक्वाथःश्वातुर्थिकज्वरापहः॥ अगस्तिपत्रस्वरसेनिहंतिनस्यंसहिंग्वा
न चातुरोगमुग्रं॥ कासंश्वासंचापिशिरोरुजांचनाशंतिलंप्राप्तेनराणां॥१॥ रसोनकल्कंतिलतैलमिश्रंमक्षीतिनित्यंविषमज्वरार्तः॥ विमुच्यतेसोविषमज्वरेभ्योवातामयेभ्यश्चाप्यतिघोररूपैः॥ निर्गुंडिकानिंबदलानिकृष्टंवचागुडूचीगुग्गुलसर्षपाणां॥ क्वाथंतकेसर्पियुतंचधूपविनाशकंवैविषमज्वराणां॥ इत्याष्टांगधूमः॥ सुरसामूलमाहृत्यहस्तेबद्धंशुभेहनि॥ वेलाज्वरादिकान्हंतिभूतज्वरविनाशनः॥ मुस्तामृतामूलकयाचनागराकंटकारिका॥ कणाचूर्णान्वितःक्वाथस्तथामधुसमन्वितः॥ एकाहिकंवाव्येलासुज्वरंजातंव्यपोहति॥ रसोनबीजंनिधायखंडंकृत्वानिशासुचि॥ तक्रमध्येविनिक्षिप्यप्रभातेघृतसंयुतेपासेवितोपिज्वरान्हंतिवेलाद्यादेहधातुगाः॥ पिप्पलीवर्धमानंवापिबेत्क्षीररसायनं॥ महौषधंसधान्याकंसचंदनंदत्वाशुकं॥ गुडूचिकायाःपयःविषंत्रितीयकज्वरापहं॥ अपामार्गस्यमूलंवानीमूलमथापिवा॥ लोहितेनतुलासूत्रेणाभिमंत्र्यप्रमाणकं॥ बद्धंचाप्यथकर्णेचहंतित्रितीयकज्वरं॥ भागीरथ्युत्तरेकूलेतापसोपुत्रकोमृतः॥ तस्यतिलांजलिंदानात्मुच्यतेकाहिकज्वरात्॥ वानरस्याकृतिंलिख्यखटिकायाःपुनःस्मृत्वा
गंधपुष्पाक्षतैर्धूपैरर्चयेन्नाभिषग्वरः॥ ॥ओं ह्रीं श्रीं सुग्रीवाय महाबलपराक्रमायसर्व

र्यपुत्रायअमिततेजसे॥ एकाहिकंत्र्याहिकंचातुर्थिकंमहाज्वरंभूतज्वरंभयज्वरंशोकज्वरंक्रोधज्वरंवेलाज्वराणांदह दह पच पच अवतर अवतर कलितरवमहावीरवानरज्वराणांबंधबंधह्रींह्रूंफट्स्वाहा॥ नास्तिज्वरः॥ज्वरागमनसमयेज्वरस्त्रास्यते॥ इतिसुग्रीवमंत्रः॥ ॥ इतिभूतज्वरचिकित्सा॥ ॥ वानरस्यसुरूपंहिव्यंतरुणादित्यतेजसं॥ ज्वरमेकाहिकंघोरंनक्षणादेवनाशयति॥ पुनश्चात्रप्रवक्ष्यामिज्वराणांरूपलक्षणं॥ संतप्तकांचनाभासतप्तकांचनभूषितः॥ दंडीयज्ञोपवीतंचशूद्रोब्राह्मणरूपधृक्॥ जपाकुसुमसंकाशोरौद्रदंष्ट्राकरालिनः॥ खड्गहस्तोमहारौद्रोमहेंद्रःक्षत्रियोविदुः॥ चंपकप्रभवाभासतप्तकांचनभूषितः॥ दंडहस्तोमहाभोगीवैश्योज्वरेश्वरोविदुः॥ रुक्षोमेघाजनाकारस्तीक्ष्णदंष्ट्रोज्वलाननः॥ त्रिनेत्रोज्वलनप्रख्यःकालरुद्रोविजानते॥ इतिज्वराणांलक्षणं॥ संतप्तकांचनाभासतप्तकांचनभूषितः॥ दंडहस्तोमध्यवेगीवैश्योज्वरेश्वरोमतः॥ इतिज्वरेश्वरोमतः॥ रुक्षमेघाजनाकारतीक्ष्णदंष्ट्राज्वलाननः॥ त्रिनेत्रोज्वलनप्रख्यःकालरुद्रोविजानतः॥ इतिकालगंभीरोरौद्रज्वरःमाहेंद्रज्वरः॥ ॥ कालगंभीरज्वराणांनिदानरूपाणि॥ तीक्ष्णवेगःक्षुधालोल्यःशुचिद्वेषीघृतप्रियः॥ मत्तंकिंशुकाभासंपाशहस्तोतिजल्पकः॥ चतुर्भुजःसो

आत्रे॰तृषाक्रांतो द्वेष्टि पीडितो नरः॥ तस्य स्नानं जपो होमः कृत्वा शांतिः प्रपूज्यते॥ इति गौडज्वरलक्षणं देवव्यापाश्रय संहिता
याक्रियाः॥ तीव्रज्वरोऽतिसंरक्तसूत्रत्वेचमूत्रते॥ कुरुतेयुद्धवांतीचउत्क्षिपतिबलातुरः॥ तत्पनेत्रोमहा
श्वासःसंवेष्टनेक्षुधाद्विषः॥ मधुगंधोमुखेस्वेदोमाहेद्रेणादितोनरः॥ तस्यादोषहोमंतुदेवतास्नपनेशु
चिः॥ दानजाप्यादिकंकर्मप्राप्यतेसिद्धिसंगमः॥ इतिमाहेद्रज्वरलक्षणक्रियाः॥ मधुवेगःपीतगात्रः
स्वप्नशालोरुचिस्तथा॥ शीतपल्लवहृद्रुवंकंटस्वेदोतिविकलः॥ वह्निर्नीतंदहत्यंपल्लवानांचशीतता॥
रुक्षनेत्रदंतजिह्वातंद्रास्निग्धांगविभ्रमः॥ हृल्लासोबहुमूत्रोभक्तियुक्तोमितीतलोचनः॥ उन्मादी
चातिदृप्तोक्षीरतेषुविकलेंद्रियः॥ प्रणयीक्रोधनोद्वीर्यासोचैवाभिक्षणात्॥ कालगंभीरकेनापियस्ते
सिद्धिर्नजायते॥ स्नानंदानजपंसुरार्चनंविधिहोमदयाप्रीतताभूतानांचदिवौषणेनबहुधात्रिंचकुर्या
त्ततः॥ गोभूम्यन्नसुवर्णदानविधिनादानेनशांतिर्भवेत्सर्वासांचरुजांविनाशनमिदंशंतिसत्यव्रताः॥
शालिषष्टिकभक्तानियूषमुद्गकीषुच॥ पूर्वोक्तानिचशाकानिवातघ्नानिप्रशस्यते॥ शतपुष्पाचजीवंति
तंडुलीयकवास्तुकं॥ घृतेनभर्जितासिद्धाशाकपत्राइमेस्मृताः॥ लावतित्तिरिमांसानिवार्ताकानितथातु
रैः॥ मृगछिकरकाकायानिजांगलानिप्रयोजयेत्॥ कोशातकीपटोलंचतुंडीकरहितंभवेत्॥ वर्जयोद्दु ५३

लाभानिविदाहीनिगुरूणिच॥ नपिंडूलानितैलानितथाम्लानिवर्जयेत्॥ कोसातकीपटोलं दुधिमस्तुविशाला
लानिक्षुद्राण्यनिभिषग्वरः॥ बहुदकंचतालूलंघृतंचापिसुरापिच॥ क्रोधंवाशोकमेवंचस्त्रीसेवांचविभुं
जते॥ नकुर्याज्जागरंरात्रौदिवास्वापंचवर्जयेत्॥ नरथंवाहनेयानंगजस्यचलनंत्यजेत्॥ तद्दाज्वरित
स्तोयंचनिश्चेष्टंभोजनाचरेत्॥ शुभविधानतिधानमास्थितेनित्यंजोभवेत्॥ व्यायामंचक्षयंचअत्या
शीरात्रिजागरं॥ ज्वरमुक्तोनसेवेतयावन्नापद्यतेबलं॥ इतिभात्रेभाषितेहारीतोत्तरेज्वरचिकित्सना
माध्यायः॥ ४॥ ४॥ ४॥ ॥ दीर्घमंत्रेणयजतःऋषस्तस्यमहात्मनः॥ अलक्ष्याःपशवस्तीक्ष्णातंतोगावः
प्रकल्पिताः॥ तासांमुपगतानांचगवांमत्यर्थसेवनात्॥ असात्म्यत्वादतिपानात्तीक्ष्णत्वाच्चविशेषतः॥ अतिस्ने
हाच्चसंक्षीणाजाठराग्निःपुराकिल॥ अतिसारस्तदोत्पन्नोदोषाद्धातुमलात्रयः॥ अथातिसारविज्ञानंभे
षजंशृणुचत्रिक॥ ज्वरस्यैवातिसारस्यषडेतेयुगपद्भवेत्॥ स्निग्धातिशीतगुरुकिन्नमुपिष्टलानदु
ष्टान्नादिविषमान्नपानभक्षणात्॥ मद्यादजीर्णतिलक्षारकेभ्यैर्विषैर्वाशोकार्तिदुष्टपयसस्तुविपर्ययेषु॥ दौर्बल्यतोविषमभोजनकैश्चसंचीयतेबहुमलोविनहंतिचाग्निं॥ संजायतेहिमलसंतदतिसारःहत्वाऽग्निमतुलंहितदातिसारं॥ संजायतेसमुपुनर्बहुलोमलेनसर्वंचधातुगदितोमुनिभि

आत्रेयविधिज्ञैः॥ वक्ष्ये समासतउदीर्णरुजश्चनाशं॥ युगपद्योज्वरश्चैवअतिसारस्तथैवच॥ज्वरातिसारौघोरौतौसंहिता
कटसाध्यौमतिषिणां॥ नपित्तेनविनासोपिजायतेशृणुपुत्रक॥ तस्यनोलंघनंश्रेष्ठंज्वरेचैवातिसारके॥
सुवर्चलमतिविषाहिंगुपथ्याकलिंगकैः॥ शुंठीचामातिसारघ्नीशूलघ्नीग्राहिपाचनी॥७॥ पथ्यादारुवचा
मुस्ताधान्यागुरातिविषायुतैः॥आमातिसारनाशायक्वाथमेभिःपिबेन्नरः॥ उत्पलंधान्यकंशुंठीवृष्टीपर्ण
बलायुतं॥ बालाबिल्वंगवांतक्रेनासक्लेनप्रपेषयेत्॥ तेनलाजाकृतंमंडंदेयंपानायशीतलं॥ज्वराति
सारशमनंकुतानलबलप्रदं॥ उत्पलपद्मंशुंठीविषाजलधरामृतवत्सकानीमेघाब्दयंकनकशीतसैरेणे
लकः कषायः॥ पाने विधेयमधुनाप्रतिसाधितस्तुदेयोज्वरातिसंबंधीशमनायचेषः॥ ९॥ पाटेंद्रभूनिं
बधनामतावत्सपर्पटक्वाथचरेप्रशस्तं॥आमातिसारंजयतेद्रुतंवाज्वरेणयुक्तंसरुजंचतीव्रं॥शुंठी
वालकमुस्तबिल्वपाठातिविषाचधान्यानि॥ पाचनमरुचौषद्विज्वरातिसारंचनाशयति॥चत्वकस्यफल
दारुरोहिणीधान्यबिल्वमुंगधात्रिकंकटकं॥ निंबबिल्वगजपिप्पलीवृक्षाक्वाथएषमरणज्वरापहः॥
पंचमूलीबलाबिल्वाभूनिंबस्तैनागरैः॥ पाठाभूनिंबहीवेरकुटजत्वक्फलैःशृतंप्रहंतिसवैज्व
तिसारंवमिश्वासज्वरादितान्॥ सशूलोपद्रवश्वासंहन्याच्छीघ्रंसुदारुणं॥ पंचमूलंतिसारा

न्यायोज्वापित्तेकनियसी॥ महतीपंचमूलीतुवातश्लेष्मज्वरेहिता॥ पंचमूलीक्वाथः॥ उत्पलंदाडिमंत्वक्केशरंस
ध्यजंधात्री॥ पिष्टंतंडुलतोयैःपानंज्वरातिसारघ्नं॥ उशीरंधान्यकंमुस्तंसबिल्ववालकंवलातथाचधातु
कीपुष्पंकषायंमेवशास्यते॥ ज्वरातिसारशमनंससोणितःसपेच्छिकः॥ निहंतिकामलाशोफपाचनंरुचिर
प्रदं॥ इतिज्वरातिसारचिकित्सा॥ ७॥ कबूदरेवस्तिनाभिदेशेपायुप्रदेशेपघनंनिरोधे॥ वातानि
रोधेविट्संगभंगाभवंतिसर्वेषुतिसारकेषुच॥ सकेनिलंपिच्छलमेवरूक्षंअल्पंसहच्छामसशब्दशूलंच
रूक्षंभवेत्सात्रविचेष्टनंचवातातिसारेप्रवदंतितज्ज्ञाः॥ तस्याद्यौलंघनंचैवमलंवातिविशोधनं॥तस्मोदेयं दो
कषायंतुपानभोजनमेवच॥ नतुसंग्रहणंदद्यात्पूर्वमामातिसारिणे॥ दोषाश्चादौबध्यमानाजनयंत्या
मयान्चहून्॥ शोफपांडूमयग्रहिकुष्ठउन्मादरज्वरान्॥ दंडकालसकाध्मानग्रहण्यर्शोगदास्तथा॥स्त्री
णधातुबलार्तस्यबहुदोषातिनिश्रुतः॥आमेपिस्तंभनीयःस्यात्पाचनंमरणंभवेत्॥ स्तोकंस्तोकंविदुर्ब
वासमूलंह्योतिसार्यते॥ अभयापिप्पलीकल्कैःसुखोष्णैर्घृतषंडकैः॥ उदीच्यधान्यनिर्जलेनकल्कपा
नेभिहंतिपाच्यतेतिसारं॥ तत्क्षणंपहंदाहविशाशनंस्यात्सर्वमूलहिक्कापिविनाशनंस्यात्॥ वालकहृद्यघना
भयशुंठ्यापर्पटेनसहितासजलेन॥ क्वाथंपानंतरीमतिसारेनाशमाशुकुरुतेविदुशांति॥ शालपर्ण

आत्रे पृश्निपर्णी बृहती कंटकारिका॥ बला श्वदंष्ट्रा बिल्वानि पाठा नागरधान्यकं॥ एतद्दाहरसंयोगे हितं सर्वातिसारिणं॥ संहिता
दिंडुकत्वचमाहात्म्यकाश्मरीपत्रवेष्टिता॥ मृदाविलिप्ता विधिवद्दग्धेन्धनाग्निना भिषक्॥ रसंग्राह्यमधुयुतं पानंस
र्वातिसारहृत्॥ स्निग्धं घनं कुटजवल्कलजं तुजग्धं आदाय तेक्षणमितं तनुकुट्टयित्वा॥ जंबूपलाशपुटतंडुलतो
यसिक्तंषडंकुशेनचाबहिर्घनपंकलिप्तं॥ सक्षिप्तमेतदवपीड्यरसं गृहीत्वा क्षौद्रेणयुक्तमतिसारवतेप्रदद्यात्॥
इत्यात्रिपुत्रपरिपूजितएवयोगः सर्वातिसारहरणेस्वयमेवराजा॥ इतिकुटजपुटपाकः॥ ॥ पलप्रमाणंकुट
जंगृहीत्वाप्रस्थद्वयोबुसहितैर्विपाच्यः॥ शुंठीचरोध्रंगजपिप्पलीचहिंगुकुबेरातिविषाचमुस्ता॥ बिल्वंचपु
ष्पाणिचधातुकीनां प्रक्षिप्यभूयोविपचेत्तुतावत्॥ दाक्प्रलेपःस्वरसस्तुयावत्पीतस्त्वसौकालविदाजलेन॥
मंडेनवाजापयसौथवापिनिहंतिसर्वातिसारमुग्रं॥ रूक्षंसितंलोहितपित्तकंवादोषाग्रहण्यांविविधंचरक्तं॥
पित्तंतथाश्मीसिसशोणितानिअस्रक्प्रदरंचैवमसाध्यरूपं॥ निहंतिवश्यंकुटजाष्टकोयं॥ इतिकुटजाष्टकं॥
अथेदंसुसंपक्वंदीपाग्नेःसुचिरोषितं॥ नानावर्णमतिसारंपुटपाकैरुपाचरेत्॥ विगतामक्षमतीसारंचिरो
त्थितंरक्तसहितमतिदुष्टं॥ मधुनासहितंशाम्यतिअरलकपुटपाकनिर्यासः॥ जंबूवटोदुंबरपूरकोहीना
मियोदुंबरिकाशमीच॥ मुंडीसप्तपर्णीबृहज्जीविकायाअसोपेत्यकुटजंविदध्यात्॥ प्रस्थद्वयंयाप्रपिबेद्वि

तावद्यावद्विशोषंतमिदंप्रजायते॥ पुनःकटाहेविपचेच्चसम्यक्दाक्प्रलेपःस्वरसेचयावत्॥ उत्तार्यचूर्णं भिषगु
न्मेनक्षौद्रेणमिश्रंहरतेतिसारं॥ कारीतेनपुराप्रोक्तोकाकवीसुरपूजितः॥ आलोक्यानेकरोगाणिचात्रेयेण
विपूजितः॥ इतिकाकवी॥ जंबूत्वचंवत्सकवल्कलंचनिःकाथ्यचूर्णंसलिलेचुसार्मणे॥ चतुर्विभागोपिविशोषतो
पिदुत्तार्यवस्त्रेयथागालयेच्च॥ पुनःकटाहेविपचेच्चसम्यक्दाक्प्रलेपःस्वरेससुयावत्॥ उत्तार्यशीतेमधुना
विमिश्रंलीढंहरेज्ज्ञातिसारमुग्रं॥ आमंसपीतंकुणपंजलाभंपूयसंनिभं॥ नाशायेत्पीतमात्रेणतमःसूर्योदयो
यथा॥ इतिगंगाधरीमहापाकः॥ पलंतुवत्सस्यपलेजलाष्टकेपुनःपचेद्दाडिमतोयसंयुतं॥ तस्माद्घृतंवरंतत्कृ
तंरक्तातिसारीमरणंनयावत्॥ तुलांतथार्द्धांगिरिमल्लिकायाःसंकूट्यपक्वंरसमादधीत॥ तस्मिन्सपूतेपलसंमि
तानिश्लक्ष्णानिपिष्ट्वासहशाल्मलेन॥ पामासनंगातिविषासुमुस्ताबिल्वंचपुष्पाणिचधातुकीनां॥ प्रक्षिप्यभूयो
विपचेच्चतावद्यावत्प्रलेपःस्वरससुयावत्॥ पीतस्त्वसौकालविदाजलेनमंडेनवाजापयसौथवापि॥ निहंतिसर्वा
तिसारमुग्रं श्लक्ष्णंसितंलोहितपित्तकंच॥ दोषंग्रहण्यविविधंचरक्तंपित्तंतथाश्मीसिसशोणितानि॥ अस्रक्प्रदरं
चैवमसाध्यरूपंनिहंत्यवश्यंकुटजाष्टकोयं॥ इतिवातातिसारः॥ घर्मेणचोष्णानविभोजनानिपित्तेनतंतोटकसं
हितेन॥ शोकेनतोपेनरुपाकटुत्वेक्षारेणपित्तासृक्सारकःस्यात्॥ तेनारुणंपीतमथातिनीलंदुर्गंधिश्लेष्मज्व
रपाटुमुक्तं॥ भ्रमातिमूर्छाविकलोगदाहःपित्तातिसारेविकलक्षणानि॥ इतिलिपर्णिपृश्निपर्णीबलाबिल्वास्तु

लुकदाडिमीफलंचूर्णंदाफसवत्सकंविषं॥आटरूषकचूर्णोनिसंक्षिप्यात्रविदुर्बुधः॥आजाकुंधंतद्
धेनुघृतंचाष्टांशानिःक्षिपेत्॥दायुसलेपितंज्ञात्वागुडस्यषोडशेवचफलानिनिक्षिपेत्तत्रदेयमप्तानरा
ढिने॥त्रिदोषःसंनिपातोवातिसारश्चातिदारुणः॥शूलमूर्छाभ्रमदाहकामलानांविपाचनः॥क्षुत्तृक्षा
क्षयानांतुहितोयमुत्तमोवटः॥इतिवृतवटकः॥पक्वबिल्वशिरोध्रंचूर्णंमध्याज्ययोजितः॥लेहोर
क्तातिसारघ्नोबालानांक्षीणदेहिनां॥इतिसन्निपातातिसारचिकित्सा॥॥यदागुदंनिःसरत्यतदाक्रि
यांविधाक्रिया॥सहचर्यबलानांचरसंगृह्यघृतंपयः॥पक्वंघृतेनलेपस्यात्तस्मात्तंदग्धमुद्धरेत्॥तक्रा
रीपल्लवकाथोवाकुंस्वदनेहितं॥लोष्टंघृतंघृतमथावाग्निनिर्मथ्यनिर्वाप्यकांजिकेविदधीतनहृत्
सोरुव्यायनस्यगुदमेकमितिप्रशस्तंभ्रंशेगुदेहिविनिवेश्यचबंधनंस्यात्॥इतिगुदभ्रंशचिकित्सा॥लसु
णकुणपगंधंघनंवापलल्लजसमानंपक्वंबूनिर्भवा॥घृतमधुवयसाभंतैलसेवालनिलंसघनदधिसवर्णं
वर्जयेद्वातिसारं॥भ्रममदतमकार्तिशूलमूर्छाविदाहंश्वसनमतिविशीर्णंछर्दिमूर्छत्तिषार्ति॥विकलमति
र्नौनासौख्यंशोफज्वरांस्तमुपहरतुहरंसिद्धिदानंचदद्युः॥इतिअतिसारचिकित्सा॥यदाल्पमल्पंक्रम
शोनिषेवितंमलंमलाधारगतंचनित्यं॥हृत्वानराग्निंकुरुतेनरस्यविकारमाढ्यग्रहणीतिसंज्ञां॥निषेवितंचा

तिसारैःशमयातिदग्धंभूयसादूषितोपिभक्तान्नमृपलाशंबकुशमयतिशयंसंचयत्वानुसर्तुं॥वारंवारंविगर्ह्य
सरुजंमायमलपक्वमामंघनंशीतंवाकुर्व्याधिघोरंमानुजस्यकरंमानुषस्यप्रदिष्टं॥लक्षणंचातिसारश्चविस्तं
यंग्रहणीगदे॥वातिकंपैत्तिकंचैवश्लैष्मिकंसान्निपातिकं॥नेवचैकेनदोषेणज्ञायतेग्रहणीगदः॥तेनक्षीय
तेदेहःसंमर्दोविपाकतः॥तिक्तैकषायकटुकाम्लविदाहिरूक्षैःशीतास्यभोजनपरैःश्रममैथुनश्च॥प्रारा
ध्यहस्तिरथवाहनधावनैर्नसंक्षुब्धवायुरितिहंसनिलरोगभूमिं॥तस्मात्तदन्नमनिलेचतुष्टियमानरंकेन
युक्तमनलेपरिपाकमेति॥संजायतेपिमनुजस्यतथानदोषंगुल्मोहिनामसनुपंचविधोवभूव॥प्लीहोयकृ
ज्जठरकंनुमलाविबंधःशीलःकफिजठरोगभवोहितस्यात्॥एतेभवंतिचगदाग्रहणीसमुत्थाघोराःसदेव
मनुजस्यशरीरकस्यकंठास्यशोषतिमिरंहृदिपार्श्वशूलंनोव्यथातिकशातातिविसूचिकाच॥कर्णेश्वनो
तिवमनंकृमिशूलमोहैःसाध्यंनगुल्ममितिलक्षणमेवविद्धि॥यस्येतानिचलिंगानिगुल्मंशंकीविदुर्बुधं॥ग्र
हणीनामसुःसाध्यास्तस्यवक्ष्यामिलक्षणं॥चित्रंसशब्दंसृजतेपिवर्चःसफेनिलंगंधमतीवरूक्षं॥श्वासार्तियु
क्तंतनुशीतलंचस्रावोयहिण्यांपवनप्रकोपात्॥विदाहिजीर्णेसरुजोतृषार्तिर्दुर्गंधिपीतारुणनिलकालं॥
संसृज्यतेयस्यमलोविमिश्रःपित्तोद्भवाकुर्यणोविधिज्ञः॥हृल्लासघाढ्यःश्वसनंचशोफःकासोजडत्वंचसदं

आत्रे॰ तताच॥ वेरस्यतास्य गुरुगात्रतास्यादरोचकंसाकफलत्रयदस्यात्॥ दारुनागरनिशासावासकंकुंडलीमगुसंहिता धजासदीघनं॥ रास्नाभागईसरलाकपोस्करंपाचनंभेवतिवातिकेग्रहे॥ पिप्पलीबृहतिव्याघ्रीयवक्षारकलिंगकाः॥ चित्रकंसारिवापोटासदीलवणपाचकं॥ तच्चूर्णंपाययेदधासुरयोस्नभसापिवा॥ मारुतग्रहणीदोषशमनंदीपनंपरं॥ ग्रंथिकोन्मभयाकल्कोविडंगास्नेघटिस्थितं॥ मासंतकंग्रहण्यर्शःकासगुल्मकृमिहरणं॥ कवलंमौषधंवापिनिरन्नस्यान्नमेववा॥ तकंदोषबलोपेतंप्रयोज्यंग्रहणागदे॥ नलवेणुकुशानांचकासेक्षुण्णंचमूलकं॥ निःक्काथपानंहितंतस्यपाचनंपैत्तिकेग्रहे॥ व्याघ्रीग्रंथिकचव्यंसुरसासुंठीसदाडिमंरजनी॥ घनाचित्रकमेवंहिक्काश्वेग्रहणीकफात्यये॥ मुंडीकणाद्विरजनीघनचित्रकंच॥ एषांचतुर्गुणमितात्रिफलाविडंगंसिंधुश्वदह्नित्रिकटुत्रिसुगंधियुक्तं॥ चूर्णंतुनागुडयुतंघृतमिश्रितंच॥ कृत्वापिमोदकंबिडालपदप्रमात्रंभक्षयेद्यथाबलमपिग्रहणीवादंच॥ ओर्शोभगंदरमरोचकगुल्ममेहानुशूलाश्मरीकृमिजरोगहरंचपांडो॥ श्रेष्ठरसायनमिदंबलिनाज्ञानेस्याद्दृष्यंबलंदिधतेप्यतिलुप्तदोषं॥ वर्णक्रियाग्निबलदीप्तिकरंरुजघ्नंकुष्ठश्रमापहरणंकुरुतेसदैव॥ युक्तोपयुक्तमितिसर्वगुणोनृहृद्यो दारुणगुणाश्जनतेयुवावत॥ सुत्यादिअमृतप्राशनघटकंनाम॥ ॥ ॥ हरीतकीपंचशतानिधीमान्गोमूत्रद्रोणेनसहद्विपाच्यः॥ मृद्वग्निनायावदशीषमेवमूत्रेविजीर्णेविधिवद्विधिज्ञः॥ निर्वाप्यचूर्णंप्रवि

क्षेप्यज्ञातेछायाविशुष्कंप्रविदार्यचास्थि॥ चूर्णंचसुंठिमगधाविषाचत्रिगंधमूर्वाचविकाचितंच॥ निःक्काथ्यश्लीकुटेजस्यतावद्व्याप्रलेपाभवतितियावत्॥ तस्याविभागेनगुडंविमथ्यक्षीरेतदर्धेनगवाजकैर्वा॥ निर्वापितंतत्घृतभाजनेषुसंस्थापितंचूर्णमिदंप्रशस्तं॥ सिंधुश्वावह्नित्रिकटुत्रिसुगंधियुक्तंचूर्णंतुनागुडयुतंघृतमिश्रितंच॥ चूर्णेनतेनसकलाग्रहणीचपांडुःशोषाश्मरीकृमिजगुल्मगदानिसारान्॥ क्काथंचतच्छ्वासभगंदराणांविश्लेषकोपीनसमस्तकार्तान्॥ विनाशनंसदामहाज्वराणांअध्वश्रमक्षीणबलोदराणां॥ एकाहिकादिज्वरनाशनंस्याल्लेहोभयाद्योमृतवत्नराणां॥ इत्यभयावलेहः॥ द्राक्षाक्षीरेणपक्वाघनेदार्व्युपलेपितेदृष्टा॥ पश्चाद्रेणिसमालोड्यइमानिचोपधानिमक्षिमतिमान्॥ पर्पटातिविषामूर्वापिटोलंघनवालकं॥ तथाभयानांचूर्णंतुसमशर्करायायुतं॥ तेनक्षीरेणसंयोज्यंविदार्याकंदमेवच॥ घृतेननवनीतेनपिंडंकृत्वातुभक्षयेत्॥ पित्तग्रहण्यांपांडुचकामलातितृष्णाहृल्लासभ्रममूर्छातथाहिक्कातमकोन्मादमश्मरी॥ कृमिपित्तास्रगंकुष्ठंनाशयेत्सासुनिश्चितं॥ इतिद्राक्षादिक्षीरं॥ ॥ द्रोणंमधुकपुष्पाणांविडंगार्धंततोपिच॥ चित्रकस्यततोर्धंचतथाभल्लातकाढकं॥ मंजिष्ठार्धंचपलेचैवहिद्रोणेपंचविपाचयेत्॥ द्रोणावशेषंतच्छीतंमधुहृद्दाडिमसंयुतं॥ एलात्वक्पत्रमृणालागुरुभिश्चूर्णैर्नाथसंयुतं॥ कृत्वामासस्थितंजातंआसवस्तंप्रयोजयेत्॥ ग्रहणीरोगपयत्येषबहुनोरक्तपित्तनुत्॥ शोफकुष्ठकिलासानांदोषेष्वेहितात्रिनां॥ तद्द्राक्षेक्षुखर्जूरस्वरसानासुतान्विवेत्॥ ॥ इतिग्रहण्यांमधुपुष्पासवः॥ ॥ ॥ अस्तिकंपि

व्यल्पं विडंगगुडमध्यं विभीतकान्॥ मधुनः प्रस्थसंयुक्तं यवपले निधापयेत्॥ तस्मात्तु त्रिफलातांतु पलं सलिलद्रोणसंहृतात्
संयुतं॥ विपचेत्पिंडसर्वं हृद्यं रोगानेकविनाशनं॥ स्वस्थोप्येतत्पिबेन्मासं नरः स्निग्धरसाशनः॥ इत्थं तेषां मनुष्या
णां रोगाणां ये प्रकीर्तिताः॥ इतिमागधासवः॥ शृणुपुत्र प्रवक्ष्यामि गुल्मानां लक्षणं पृथक्॥ तस्मात्तेषां प्रतीकार
मौषधानि विशेषतः॥ पंचधा संभवंत्येते गुल्माजठरसंश्रिताः॥ हल्लक्ष्मिनाभिबस्तोच्चमध्ये पंचमकस्मृतः॥ हृद्
यस्थोयकृन्नामकुक्षौ प्लीहकउच्यते॥ मध्येबृहत्समाख्यातो बस्तौ चाऽपिविवर्धकः॥ नाभौ संस्थस्तु ग्रंथिर्नामान्येषां
पृथक्पृथक्॥ अतःप्रकोपंवक्ष्यामि येनकुर्वंतिबाधकं॥ स्वभावात्तिक्तरूक्षाद्यैः सेवंतेमलविद्राहि च॥ उष्णक्षार
मद्यंवाचोल्पपानात्तिसेवनात्॥ तथाशोकश्रमाध्यानात्तृषावेगसंक्षोभणादपि॥ उच्चभाषणमानेनधनुर्जाकर्ष
णेनच॥ पृष्ठेसुप्तस्याभिघातेनहृद्योताडनेनवा॥ भारस्योद्वहणाद्वापि रक्तंदोषयतेहृदि॥ तेनगुल्मइतिनामजा
यतेरक्तपित्तजः॥ कदाचित्त्रिदोषेषुसंभवश्चास्यदृश्यते॥ वातेनोदीरितंरक्तंकफेनचेपनीकृतं॥ पित्तेनपाकतां
प्राप्तंत्रिदोषसंभवंयत्कृतं॥ लक्षणंतस्यवक्ष्यामियेनंतमुपलक्षयेत्॥ क्षीयतेयेनमनुजोमृत्युमाशुप्रवर्तते॥
वमिर्मुहुस्तथाहारोहल्लासश्चश्वसनश्रमः॥ दाहारुचिस्तृषामूर्च्छाकंठेदाहःशिरोव्यथा॥ हृत्पीडनंचप्रतिश्यायो
वृंहणंकफकासता॥ सशल्यहृदिशूलेचनिद्रानाशःप्रलापता॥ हृदयंमन्यतेजात्यंउदरंगर्जतेभृशं॥ एतैर्लिं
गैर्विजानीयाद्यकृत्प्लीहंतथाक्षयात्॥ यदिसाध्यतजादृष्ट्वातेनश्वासोतिदुर्बलः॥ तदाघ्नंचसशूलंचकास

५१

स्योद्गारतावमिः॥ पूयाभिःपांततेश्लेष्मा मूर्तिगंधोतिविस्वरः॥ रक्तामस्तकसंकाशाछर्वनेचसुकर्दुरः॥ तथातिसा
र्यतेरक्तंश्रमात्क्षीयतेवपुः॥ क्षैज्यःसमहाप्राज्ञेयकृद्दाल्यामिसंश्रितः॥ श्वासतृष्णावमिःमोहःशोफःस्या
त्करपादयोः॥ रुचिर्बंधोतिसारश्चयकृद्दूरंपरित्यजेत्॥ अतीक्ष्णवक्ष्यामिभेषज्यंयेनसंपद्यतेसुखं॥ तस्या
दौलंघनंचैकंपाचनंतदनंतरं॥ शुंठ्यपकुलयामरिचंसटीनांयवानिकाचित्रहरीतकीनां॥ क्वाथोयकृत्सा
चनकोपिज्ञास्यआनाहगुल्मार्तिविषूचिकानां॥ भार्गोपकुल्याहयशृंगवेरंपथ्यात्रिभांगिंकणाचतुर्थः॥ कृष्णंतथा
पंचमकंयवानीषट्चसिंधूत्थविमिश्रितंच॥ सूक्ष्मंचचूर्णंसहरामठेनभक्ष्येचतस्योपरितक्रपानं॥ निःक्वाथ्य
तोयंचपिबेत्तथाम्लंसौवीरकंवाविनिहंतिशीघ्रं॥ यकृद्विदाधोदरशूलकासविषूचिकाजीर्णकफामयघ्नः॥
पांडामयाशोग्रहणीसगुल्मान्सुंठ्यादिचूर्णंत्वरितंनिहंति॥ इतिसुंठीचूर्णं॥ ॥ क्षारंमुष्ककिंशुकार्जु
नधवाम्रमार्गवंभाविलाजीवंतीकनकाह्वयंसरजनीकूष्मांडवल्लीतथा॥ वासासूरणमेवतोन्नदहनोप्रज्वाल्य
भस्मीकृतं॥ तोयेनप्रतिसेच्यनिःस्रुतपयःपानंविधेयंयकृत्॥ शूलानाहविदाधगुल्मकफजान्मेहांश्चयत्नाद्व्र
णान्॥ विद्रध्योहृदिशूलपांडुकमलाशोफार्शसोहृत्तिवे॥ क्ष्येक्षीतयकृत्पूर्वसोपवासंचपाचनं॥ नदेयंहिगुडंयुक्तं
चूर्णंहंतितदातुरं॥ निंबनाडीधवधवेतसंनिशाकाश्मरीचतुलसीचसिंहिका॥ क्वाथएषहरयेन्मुखेकफंशूलमाश्च

आत्रे॰ चय कृत हिनाश कृत्॥ सौराष्ट्री कासीसमहौषधानि दुरालभा वेसुमनः प्रवाला॥ दार्वीयवानी कुटजं समंगा काश्मर्य संहिता
सर्पिय कदाडिमं हंति॥ इति यकृच्चिकित्सा॥ ॥ अमार्द्रेणपानीयं पीत्वा वेगतिधावनं॥ धावतेवापिवेनोयं भुंजते
वा विदाहिकं॥ तथा पानाभ्यां हारिदुर्जरःपललेनवा विरूक्षतोगुल्म धूमाश्रितोपिवा॥ तेनहृल्लासश्रूलंवा रुधा
ध्मानंचवेपथुः॥ सल्लतेचचंक्रमणान्नभुक्तंचान्नेनजीर्यते॥ तृष्णातिसारवमनंगात्राणांदाघएवच॥ एतेलिंगैः
समायुक्तंजानीदुल्मपीडितं॥ तस्मात्तस्यप्रतिकारंवक्ष्यामिशृणुपुत्रकः॥ पथ्यासमंगाकुलिंजीसरास्नामहौषध
चातिविषासुराकं॥ जलेननिःक्वाथ्यततश्चपानंगुल्मामयानांप्रतिपाचनंच॥ कृत्वातुगर्भेविवरंपृथुसुरणस्यसत्तु
क्ष्यैलशुनहिंगुकृत्रिकाभिः॥ सिंधूद्भवादिलवणैःपरिपूर्यदुग्धंस्वादन्हृत्सुपचितान्पिसवगुल्मान्॥ क्षारः
पलाशार्जुनसुरणस्यतथैवसज्जीयवक्षारमिश्रं॥ सौवर्चलंसिंधुभवोद्भिदंचसामुद्रजंवापिविमिश्रयेच्च॥ तो
यंपरिश्राव्यविधानतोपियुक्तंतथैनान्निमहौषधानि॥ पथ्याविशुंठीरजनीसुराकाकुष्ठंविलंचजवानिकाच॥ इ
त्तथाजमोदासहजीरकेद्वेषड्ग्रंथिकाहिंगुयुतंतुचूर्णं॥ क्षारोदकेनाथविमिश्रपानंनिहंतिसर्वाण्यपिकोष्ठजानि॥
गुल्मानिसर्वाणिविशुचिकानांमंदाग्निशूलामयकामलानां॥ भगंदरानाहविबंधकार्शःकिमाशसर्वरुजंकरोति॥
क्षारार्द्यंचूर्णं॥ ॥ शूलोध्मानंतथोच्छ्वासश्चलंतेचमुहुर्मुहुः॥ वातातिसारवत्साचेत्वातगुल्मविनिर्दिशेत्॥
सव्यथंसचनंजाड्यंनिद्रालस्यंवमिस्तथा॥ शीतंतंचैवगात्राणांजडंतंमधुरास्यता॥ कांक्षाशूलविबंधा ६०

र्तमूल्यमत्यविरेचने॥ सामंसविज्ञलंयच्चश्लेष्मगुल्मस्यलक्षणं॥ त्रिकटुकजीरकेद्वेसैंधवंमाजमोदातुंबरंसुरसा॥
हिंगुयुतंतच्चूर्णंसमारगुल्मंविनाशयति॥ इतिवातगुल्मः॥ ॥ विदारीक्षीरकाकोलीमधुकंमधुयष्टिका॥ धान्यः॥
र्कयाक्वाथःपानंस्यात्पित्तगुल्मनुत्॥ नलवंजुलमूलानिकुशाकाशेक्षुभिःसहक्वाथोघृतयुतःपेयःपित्तगुल्मनि
वारणः॥ द्राक्षाविदारिसहचंदनेनकाश्मर्यशृंगाटपिप्पलीनां॥ तिक्ताभयापर्पटपौष्करार्णांमहौषधान्यय
वासकानां॥ पटोलनिंबामलकंविशालातिक्ताघनोचातिविषंचीचूर्ण्यः॥ सिद्धार्थभागेनयुतंप्रशस्तंदेयंसर्पिना
मयगुल्मनाशः॥ क्षतंतुरक्तामयकामलाघ्नंशोषाविदाहभ्रमशूलमेहान्॥ रक्तंप्रमेहंचसरक्तपित्तंविनाश
नंसर्वरुजांसमस्तं॥ इतिद्राक्षादिकाथः॥ इतिपित्तगुल्मचिकित्सा॥ ॥ सिंधूत्थपथ्यामगधासटीचव्यंसु
राह्वंगजपिप्पलीकं॥ क्वाथःसुखोष्णोनिशिपानमेवनिहंतिगुल्मानिकफोद्भवानि॥ सुरदारुसटीचव्यंसिंधूत्थंक
टुकत्रयं॥ क्वाथःसुखोष्णपानेनकफगुल्मविनाशनः॥ सिंधुत्थहिंगुमहौषधत्रिफलाचित्रकंपंचवलवणानि॥
क्षीरेद्विचयवानिचूर्णंकफजेचगुल्मेवा॥ गुडेनपथ्यामगधाथवापिचित्रंतथादाडिमतोगुडेनः॥ गुल्मेचबंधेकफ
जेसशूलेशोफाश्मरीकामलकेप्रशस्तं॥ क्षीरादिचूर्णंदेयंवाकफगुल्मेचदारुणे॥ शीधुसारयुतंतोयंकफगुल्म
विनाशनं॥ इतिकफगुल्मचिकित्सा॥ शूलंहिक्कानाथध्मानंकासमंदाग्निरोचकौ॥ दाहमूर्छातिसारंचगुल्मस्या

सांनिपातिकं॥ पालाशमुष्करंभासूरणंजीरकंतथा॥ दग्धाक्षारंपरिस्राव्यभेषजानिप्रयोयेत्॥ समेधवेचसामुद्रं सांनिपा
सौवर्चलविडोद्भवं॥ यवानीचित्रकंमुष्टीजीरद्वितुंबरूणिच॥ पथ्यासटीचकुष्टंचहिंगुनापरिसाधितं॥ योज्यचू
र्णंतथैकत्रमातुलिंगरसेयुतं॥ भक्ष्येष्वेषुलसानांहन्यादुल्लंत्रिदोषजं॥ हृद्दलवर्जयेच्चान्नंदिवास्वप्नंव्यवायि
कं॥ पानात्ययंचमधुरंशाकमोज्यंमधुद्रुतं॥ भोजनैर्नैवचैतानिशस्तानिगदितानितु॥ मधुरंदधिसर्पिर्वा
क्षीरंवानातिपिच्छलं॥ भोजनंएवहिशस्तंपानाभ्यंगोबलातैलं॥ रक्तशालिर्महाशालिकलंवाषष्टिकोदनं॥ प्रशा
स्तंचातिसारेषुगुल्मेषुचविशेषतः॥ तंडुलीयकवार्ताकंशाकंपुष्पाचवास्तुकं॥ भोजनेशाकपत्राणिप्रशस्तावेय
कागमे॥ मुद्गयूषकुलित्थानामाढकीभिःसतंतथा॥ घृतंचस्वल्पपथ्येषुयोज्येद्विषजांवरः॥ इतिसांनिपातमु
ल्बणचिकित्साध्यायः॥ ॥ ॥ ॥ ॥ अजीर्णेसंप्रवक्ष्यामितच्चाजीर्णंचतुर्विधं॥ जायतेनेहपुत्रनश्रृणु
ध्वंसमासतः॥ निशाजागरणायासाशीतपानान्नादिभिः॥ मुक्तोर्ध्वंश्रमाध्यायमाद्योल्यपिच्छलसेवनात्॥
एतैस्तुजायतेजीर्णंतंविज्ञेयंचतुर्विधं॥ आमंपक्वंविदग्धंरसशेषंचतुर्थकं॥ अजीर्णंपंचमंकेचित्रिदोषंदि
नपाकिच॥ भुक्तंचभवेच्चान्यदजीर्णंप्राणवासरं॥ सलमंविषमंचापिदोषभूतंतथाष्टमं॥ कृत्वासर्वकोष्ठा
निःसंक्षयंकुरुतेभृशं॥ तेनसंजायतेजीर्णंक्षणादग्निर्विनश्यति॥ इदानींसंप्रवक्ष्यामिअजीर्णानांपृथक्पृ
थक्॥ लक्षणंचसमासेनउपचारंशृणुष्वमे॥ आमेक्लेदःशोफगंडाक्षिकूटेसदागौरविद्वेषनंमोहतृष्णामूर्छा ६१

भ्रमंवेपथुःकंठशोषोमूर्छानिद्रोर्णस्वेदस्यमुक्तः॥ गात्राणांवैपाउनंविड्विबंधेलिंगान्येवंविद्धजीर्णेविदग्धं॥
मूर्छाजृंभागौरवंवाविबंधःशूलंस्वेदोनेत्रभंगीरतास्युः॥ तंद्राहृल्लासभोजनेवाभमश्चशीर्षरुजाजायतेवैरसांशे॥
षेभुक्तेनचान्नेनजठराग्निनमेव॥ निर्दोषंदिनपाक्यंचभुक्तंजीर्णंनिगद्यते॥ प्राप्तवासरकंचान्यत्तृष्णा
न्वितांगभंगनाः॥ गंभीरनेत्रहृल्लासकंठदाहंजायते॥ भुक्तेपरिविसृक्तेभक्ष्यमाणाशनादिभिः॥ जायतेतेनतृ
ष्णाचक्लमोमूर्छाचवेपथुः॥ विज्ञेयंविषमाजीर्णंसप्तमंचभिषग्वरः॥ तेनक्लमोविबंधोतिजायतेचशिरोव्यथा॥ व्र
णज्वरादिभिःक्षीणेशोषशेषाशनादिभिः॥ तेनभ्रमोविवर्णत्वंजायतेमरवेदना॥ इतिप्रोक्तोनिदानार्थंअतोव
क्ष्यामिभेषजं॥ येनसंजायतेसौख्यंतंशृणुष्वमहामुने॥ दृष्ट्वाचामंतथाजीर्णवमनंचसुकारयेत्॥ स्वयंवावम
नेजातेतदाकोष्ठविशोधनं॥ पीत्वासुखोष्णंलवणंप्रधाननीरंविधेयंचमुहुर्मुहुश्च॥ एरंडजंवाकमलोद्भवं
२ वाआकंडनालंविनिवेश्यवमयेत्॥ नधार्योदुष्टरसस्यशेषंयावद्भवेत्कोष्ठविशुद्धिधीरः॥ यावद्भवेदुष्टरसस्यशेषः
उपद्रवाभूयकरोतिनूनं॥ यदिकथंचित्कोष्ठेदुष्टमन्नस्यशेषेचलितेरसविकाराश्चांतरश्चापिदुष्टः॥ पिशुन
इवविकारंदर्शयित्वाशैलूषकेनयतिलघुपरासुर्जनोवाहतघ्नः॥ वरंविषंचपीतंचवरंकालहृदुष्टकं॥ तन्म
हदुःखदंप्रोक्तंरसशेषंतदीयते॥ यथावज्राग्निसंतापस्तदेवाग्निनिवर्तते॥ शमनंलंघनंचापिसुविरेकंविजा

आत्रे॰ नुता॥ कुर्यात्सश्चाप्रतीकारंयेनमाग्निःप्रदीप्यते॥ धान्यनागरकल्कंचचातत्सवारिणापानात्पुनर्जायतेद्रुतं॥ गोधूमंविदलंहिता
लोद्भूतंविष्टंभंचविषूचिकां॥ विश्वौषधामृतलतासुरदारुचित्रैर्धान्याजमोदरुचकंचजलेनपक्वां॥ काथंसुखोष्ण
मितिपानमजीर्णहेतोः सूपाचनंदनलहाहिकरंमहश्च॥ हरतकीपिप्पलीदीप्यकंसदीसनागरंतुवरुहिंगुसैंधव॥
सौवर्चलेनापियुतंतच्चूर्णकंअजीर्णकंहंतिसदैवसेवितं॥ यवकोलकुत्थाम्लहिंगुसौवर्चलंयुतं॥ पानंविषूचिकां
हंतिशूलंचापिसुदारुणं॥ धवार्जुनकदंपानांशिरीषबदरीतथा॥ निःक्वाथ्यपानमामघ्नंविषूच्यांशूलवारणं॥ क
दलीक्षारमादायरोखक्षारंतथापिवा॥ प्रश्राव्यजलपानेतुहिंसोर्वलाञ्छितं॥ आमंहरतिविष्टब्धंशूलंचाशुनिवर्त
तते॥ विषूचिनानुसंशमनंअजिर्णंजरयत्यपि॥ मंदाजीर्णातिसारस्यागात्राणांवेदनंतथा॥ शिरोर्तिशूलमाध्मा
नंशीघ्रंतस्यप्रतिक्रियां॥ करंजनिंबार्जुनवत्सकानांगुडूचिकाबीजयुतःकषायः॥ पानंसुखोष्णंवमनायदेयं
निहंतिसर्वंजीर्णमयंरचनंतु॥ मलप्रवृत्तेह्यमतुल्यदोषबलाबलं॥ प्रद्रावपिरवल्लीनांतदाग्निंवर्ता
रयेत्॥ खल्लीनांमतिवृद्धानामतिवेष्टनवेष्टनं॥ तदापार्श्वेप्रदेशेषुदहेल्लोहशलाकया॥ यदिचेन्नभवेत्सौख्यं
वेष्टनेचनशाम्यति॥ तदाचांगुलमूषुलेपुनरेवंदहेद्भृशं॥ तदंतरेचेद्रवसोमध्येबिंदुकसंनिभं॥ दहेल्लोहशला
कामित्तेनसंपद्यतेसुखं॥ जंघांतरेतिवृद्धस्यिर्मारयत्यस्रक्षयात्॥ आकर्णपूर्णमासुप्तिस्तंजतोनस्याष्टभा

गंरवलयत्रिसृज्य॥ घोणार्जुनेधःसुरसज्जवस्तेर्जालानिकर्षेदितिशास्त्रवाक्यं॥ इतिदुष्टप्रतिः॥ मातुलिंगरसंगृह्यहिंगु
पंचत्रकाजिकं॥ हिंगुसौवर्चलैर्युक्तंपानंहंतिविषूचिकां॥ क्षीरतोयंचपानायदाहस्योपरिदापयेत्॥ शूलाध्मानं
निहंत्याशुकुरुतेचाग्निदीपनं॥ आमेषुवमनंकुर्याद्विपक्वेचबलंघनं॥ विष्टब्धेस्वेदनंतद्वारसज्ञेषेविरेचनं॥उन्न
तेचातिसारेचवमिक्रोधातुरेषुच॥ अजीर्णेविषूच्यांचदिवाचस्वपंहितंभवेत्॥ त्रिकंहंतिश्लेष्मणिंचेवहृद्रोगेतु
शांरोरुजे॥ हल्लासेचप्रतिश्यायेदिवास्वप्नंचवर्जयेत्॥ फलत्रिकंयोषकरंजबीजंस्यैरसंतथादाडिमंमातुलिंग्याः॥
निशायुतंपिप्पलिकाचवर्तिस्तदंजनंहंतिविषूचिकांच॥ पुराणविशालातुसुराकुलत्थशिग्रुवचानागरकंशताह्वा॥
आमेनपिष्टावपुषंविमर्द्यखल्लीविषूचीविनिवारयंतीस्वेदोविधेयोघटबाष्पधान्यधूमैर्घटीभिर्यमनेनचैवः॥
तथोल्लपाणिप्रतिसेकमेवंजयेद्विषूचिंजठरामयंश्च॥ विडरुचकयवानीजीरकंदंदुपथ्यात्रिकटुकंकुतभुक
त्वकंवेतसाम्लाजमोदैः॥ समविहितविडंगैर्धान्यकातिविकेंजरयतिनगकूटंकाकथाभोजनस्य॥ ॥इतजी
र्णाचिकित्सा॥ ॥ कृमयोद्विविधाप्रोक्ताबाह्याभ्यंतरसंश्रयाः॥ बाह्यायूकाःप्रसिद्धास्युकिंतुषट्कांतरविद्रुधिः॥स
प्तविधाभवेद्बाह्यषट्विधांतःसमुद्भवाः॥ तासांवक्ष्यामिसंभूतिंबाह्याभ्यंतरसंभवं॥ रूक्षादतिबलास्वेदाच्छित्तव्य
ञ्जोचनादपि॥ कफजातेसमुद्भूतालिक्षायूकाभवंतिहि॥ यूकाःकृष्णापराश्वेतातृतीयाचर्मसन्निभा॥ सूक्ष्मा

तिचिपिटा तृक्षा चर्मभा चर्मयूथिका ॥ चतुर्थी विंदुकी नाम वर्तुला मत्रसंभवा ॥ मत्कुणा स्यात्तु चपिटा द्वाघो पद्वका
रिणः ॥ यूका मस्तकसंस्था नै श्वेता वस्त्रनिवासिनि ॥ चर्मयूका नेत्रेण क्षमरोमस्था कृष्णवर्णिकाः ॥ गोल्या मजीर्णान्न
धुरद्रवान्नरूक्षा भगोधूमयवान्नपिष्टे गुडेनवा क्षीरविदार्येण दिवा शयानेन सर्पिषा लेन ॥ पापोदकस्यादितिसे
वनेनृघर्मेण तापोदकसेवयातु ॥ संजायतेतेनमलाशयेषु कृमिप्रजः कोष्ठविकारकर्त्री ॥ षड्विधास्तेसमुद्दिष्टा
स्तेषां वक्ष्यामिलक्षणं ॥ कफकोष्ठमलाधारकोष्ठेसर्पतिसर्पवत् ॥ पृथुमंडाभवंत्येके केचित्किंचुकसन्निभा ॥ धा
न्याकुरनिभाः केचित्केचिल्लक्ष्मास्तुचाणवः ॥ सूचीमुखाः परिज्ञेया श्चात्राणि छेदयंतिते ॥ वक्ष्यामिलक्षणं तेषां
चिकित्सांचशृणुष्वमे ॥ ज्वरोहृद्रोगशूलंवा वमिर्हृत्क्लेदनभ्रमः ॥ विड्भेदोविवर्णतंअतिसारेसफेनिलं ॥ ग
र्जनंजठरेचैवमंदाग्निश्चजायते ॥ पिपासापीनतानेत्रेकिंचुकेपांडितस्यच ॥ ॥ गंडूपदलक्षणं ॥ सूचिवक्त्रा
श्चतेत्राणिरक्तेचैवातिसार्यते ॥ यकृद्वाभक्षयंत्यन्येरक्तंवाचमनेभृशं ॥ क्लेदंमुखेऽरुचिंजेड्यंमंदाग्निंचैवपश्यतः ॥
दृष्ट्वामंदरुजोहेयःसूचीमुखकृमिरुजा ॥ इतिसूचीमुखलक्षणं ॥ यवधान्याकुरास्तुल्यावक्ष्यामथचलक्षणं ॥
मलाशयस्थाःकृमयोगुदेजंघंतिवेभृशं ॥ तेस्तुसंपीडितेदेहेकंडूंजनयतिव्यथां ॥ विष्टंभशोनहर्षंचव्यवायेवै
मनस्यता ॥ गुदेकंडूश्चमोलानिनेत्रेक्लेदःपरूषता ॥ गात्रंजडत्वंहृल्लासदौर्बल्यंवःकृमयोविदुः ॥ हारीतःसं
शयापन्नःपादौसंगृह्यरुद्यति ॥ कथंदहेमनुष्यस्यमलमूत्रसमाश्रये ॥ संभवंतिकथंचादौवधंय

तिकथंपुनः ॥ कथंशरीरेनरसेनानाहारप्रभक्षणात् ॥ जायंतेकेनकृमयः सूक्ष्माबाप्यथगामिनाः ॥ नानाभयंतुभक्षा
नंदहतेवाहुताशनः ॥ कथंतेकृमयःश्वेतेनदहंतेतराग्निना ॥ विषंजातंयथाकीटोनविषेणमतिंव्रजेत्तथा
कृत्स्नाशयंभूतिनकृताशेनजायते ॥ भेषजंचात्रवक्ष्यामियेनतेविनियंतितु ॥ पतंतिवाशमंयांतिभेषजान्निस्तृ
णुष्वमे ॥ वचोजमोदाकमिजिल्लाशाबीजंसठीरामठकंतरुजाउग्रोदकेनापरिपेप्यपेयंपतंतिशीघ्रं
शातधाकृमीश्च ॥ सप्तीयवानिपिचुमंदपत्रंविडंगकृष्णातिविषारसोनं ॥ संपेष्यमूत्रेणनिहत्यजंतू
नाशनंसर्वकृमीरुजानां ॥ मरीचपिप्पलीमूलंविडंगंशिग्रुयवानिकात्रिहृत् ॥ गोमूत्रेणपेष्यपानाच्छीघ्रंकृमी
निहंति ॥ निशाविशाखात्रिफलाखुपर्णीशिग्रुसुराकुसलिलेनकल्कैः ॥ पानंसकृष्णाकृमिशत्रुचूर्णंविनाश
नंसर्वकृमीरुजानां ॥ सुरासासुरदारुनागधात्रिफलात्रिहतावचारसोनकैः ॥ कंपिलविडंगदंतिनीपेष्यपिबे
त्कृमीनिहंति ॥ मातुलिंगस्यमूलानिरसोनंकृमिजिद्धितं ॥ अजमोदानिवपत्राणिगोमूत्रेणतुपेषयेत् ॥ पान
मेतत्सदासंतिकृमिदोषनिवारणं ॥ ज्वरेप्रोक्तानिपथ्यानिकृमिदोषेप्रदापयेत् ॥ इतिकृमिचिकित्सा ॥ अथ
मंदानलोदरिव्याख्यास्यंते ॥ ॥ अग्निश्चतुर्विधःप्रोक्तःसमोविषमतीक्ष्णकः ॥ मंदस्तथापरःप्रोक्तंशृणुचीक्ष्णं
निसांप्रतं ॥ वातपित्तकफैःसम्यक्समःसंजायतेनलः ॥ तथैवंविषमंप्राहुर्विषमोजायतेनलः ॥ तीक्ष्णःपित्ता

आत्रेयाधिकबलेनजायतेजठराग्निकः॥वातश्लेमाधिकबलेनजायतेमंदसंज्ञकः॥ यच्चभुक्तंसुखेनांतःपाचयत्यपिचानलः॥ स समोनामिनिर्दोषःसर्वधातुविवर्धनः॥ किंचित्पाचयतेभक्षंकदाचिदविपक्वकः॥ वातेनवातविषमंकरोत्यपिविषूचिकां॥ प्रबलत्वाधिकंयोश्नातिनतस्मिंजीर्यतेपिच॥ सदाघपीतनानेत्रेतीक्ष्णोवेक्षयकृद्बली॥ यद्भुक्तंनैवजीर्यतेपिपक्वंश्लेष्मबलाधिकं॥ सोपिमंदानलोनामगुल्मोदरपरोमतः॥ समेनसमतादेहेदोषधातुबलेंद्रियैः॥ हृष्टःसंपूर्णगात्रस्तुसुचेष्टोवर्ततेनरः॥ विषमेवातलादीश्चग्रहणीचातिसारकान्॥ प्लीहगुल्मविषूचीचशूलेदावर्तसंज्ञकः॥ आनाहमंदचेष्टत्वंजायतेविषमाग्नितः॥ वातकफौक्षुभ्योक्षीणोतीव्रोभवतिपित्तकः॥ भोजनेजातेप्रीतिर्भुक्तंचैवतुजीर्यति॥ तेनभस्मकसंज्ञस्तुजायतेज्वलनः॥ पांडुपित्तातिसारश्चराजयक्ष्मा हलीमकं॥ भ्रमकृमोतिवैकल्यंयकृद्दोषोपिप्रमेहकान्॥ शूलमूर्छारुचिपित्तंपित्तान्मूत्रंकफात्मकं॥ तेनसंक्षीयतेगात्रंजायतेन्नस्यलोल्यता॥ भक्षतःकाष्ठपाषाणमपिजीर्यतितस्यच॥ इतितंत्रांतरेइतिपाठः॥ कट्वादिरूक्षान्नभुजंनराणांक्षीणेकफेमारुतपित्तवृद्धौ॥ अतिप्रवृद्धःपवनान्वितोग्निःक्षणाद्रसंशोषयतिप्रसह्यः॥ भुक्तंक्षणाद्भस्मकरोतियस्मात्तस्मादयंभस्मकसंज्ञकोभूत्॥ वृद्धकाशमूर्छाभ्रमदाहशोषमोहश्रमापिन्यधिकर्मकारी॥ इतिभस्माग्निनिदानमुपद्रवाश्च॥ इतिप्रोक्तंनिदानंचनरस्याग्निप्रकोपने॥ ६४

बहुधापिनचोक्तंग्रंथविस्तरशंकया॥ अतोवक्ष्येसमासेनभेजनाप्रथकप्रथक्॥ पाचनंशमनंचैवदीपनंहितथैवच॥ रास्नासदीप्रतिविषासुरसाचशुंठीसिंधुत्थहिंगुमगधाचसुवचलीचः॥ चूर्णकृतंसगुडंक्षभक्षमाणोवातात्मकस्तुविषमाग्निसमीकरोति॥ शूलानजीर्णविषमाग्निविषूचिकाचवातादिरक्तकलगुल्मविनाशनस्यात्॥ भुक्तोपरिक्वथितमेवपिबेत्सुखोष्णंस्नेहंततोपरिसमस्तरसानुभोज्यः॥ इतिविषमाग्निचिकित्सा॥ द्राक्षाप्रयातिक्तकरोहिणीचविदारिकाचंदनवासकंच॥ मुस्तापटोलंचकिराततिक्तंक्षुद्राबलामुसलिकंविषांच॥ एलालवंगदलपद्मकवाजिगंधाज्येष्ठाचशृंगिधनिकासकणैःसमांशा॥ चूर्णंखजूरसितासमाचघृतेनतच्चार्धपलप्रमाणं॥ भक्षेत्प्रभातेमनुश्चक्षारंनिःक्वाथपानंसघृतंविधेयंकरोतितीव्राग्निसमंप्रकुरुतेबलास्यपुष्टिंननुतेपिनूनं॥ कृमिभ्रमप्लीहविनाशनस्यात्तृड्ज्योतिलोल्यःशमनंकफेति॥ सरक्तपित्तक्षयपांडुरोगहलीमकंकामलकाशुनाशि॥ तंडुलान्कशालीनांद्वयभागेनधीमतां॥ भक्षातिलाश्चसंकुट्यतद्धेनविमिंतं॥ भक्ष्यातत्समनुस्नाश्चरकीकृत्वाचसाधयेत्॥ सिद्धंतुकसरंसम्यक्घृतेनसहभोजयेत्॥ एकाहांतरितायस्तुतीव्राग्निस्तस्यनश्यति॥ इतितीव्राग्निचिकित्सा॥ ॥अथमंदाग्निकथ्यते॥ सांद्रेणवस्त्रेणविधायरात्रौपथ्याप्रगेप्रस्थकणाग्निमात्रैकैः॥ पक्वाघृतेनापिहरीतकीवक्त्रेभुक्ताजयेत्

दोषसदाग्निमांद्यान्॥ पक्वाकल्कं मागधीचूर्णमिश्रं कृत्वैकं सर्पिषा शर्करायुक्तं॥ क्षौद्रेणाक्तं तत्प्रातः स्वल्पमात्रंभुक्तं
कृच्छ्रान्याङ्गुष्टजार्णज्वरादीन्॥ चित्रकषायपलशतमृता धात्रीचतुल्यागोः॥ संमिश्रगुडशतं तद्विपंचमूलीकषायेण॥
ततुल्येनहरीतक्याढकमेकविपाच्यखंज्यार्धप्रस्थं मनुनोक्तस्मिन्दत्वा ततोन्यैर्द्रव्यैः॥ द्वेद्वेपले निदध्याद्वेलावल्गुधु
पत्रकटुकानां॥ सर्यवक्षारार्धपलंयथाग्नि पश्चात्प्रयुंजिता॥ एतद्रसायनोत्तममग्निदंद्रायन्त्रोक्तं॥ उप
युक्तवतांपुंसामपिकाष्ठतृणानिजीर्यंते॥ अर्शःकाशभगंदरश्वासकासिशोफकुष्ठगुल्मानि॥ मासद्वयोपयोगाद्
वृद्धंयत्नवह्निमपि॥ रोगानेकसमेतं विशोषतोहंतियक्ष्माणं॥ अजितमपिभेषजशतैःनानारोगंन्यहोज्जयति॥ इ
तिचित्रकाबलेहः॥ दहनकषायचतुर्गुणतत्कल्कविपाचितंघृतंसिद्धं॥ शमयतिशूलमरोचकंग्रहणीरोगंसुदुर्जयं॥
प्लीहोदरगुल्माशःकफवातभयंनिहंत्यासु॥ अग्निंकरोतिसहसाशोषंजयतिविख्यातं॥ इतिचित्रकघृतं॥ ॥ चि
त्रकत्रिफलापाठाचव्यानांग्रंथिकस्यच॥ विडंगदेवकाष्ठंचभागान्कृत्वाचतुःपलं॥ कुष्ठभल्लातकैल्वलवचानांमरि
चस्यच॥ पिप्पलीमूलकेंद्राक्कामुस्तानांस्युस्त्रयस्त्रयः॥ पक्वावशेषितांशांशैरसेतस्मिन्हृतेपुनः॥ पूतेदद्यान्म
धुत्रस्थंगुडस्याधतुलामुन्मितामपि॥ पंचकोलंसमरिचंत्रिफलाचपलार्धकं॥ संचूर्ण्यदद्यात्तत्रैलात्वगागनाम्न
ाधापलं॥ मासैकंघृतकुंभेयंजातोरिष्टमयोजयेत्॥ चित्रकाद्यइतिख्यातोग्रहणीरोगहापरः॥ पांडुरोगोदरप्लीहगु
ल्माशोफार्शसांहितः॥ रोचनोदीपनःश्रेष्ठोनिःश्रेतसांचविशोधनः॥ ॥ इतिग्रहणीमंदाग्नेःश्चैत्रकासवः॥ ॥ ६५

तोयद्रोणेचित्रकमूलतुलार्धंसाध्यंयावत्पादशलस्थमथेदं॥ अष्टोदत्वाजार्णगुडस्यपलानिःक्वाथ्यंभूयःसांद्रतया
समेतत्॥ त्रिकटुकमिशिपथ्याकुष्ठमुस्तावरांगंक्रिमिरपदहनेलाचूर्णकार्षैर्बलेहः॥ जयतिगुदजकुष्ठप्लीहगु
ल्मोदराणिप्रबलंयतिकुर्वाणोशश्वदस्यमानः॥ इतिमंदाग्निचिकित्सा॥ ॥ पत्रफाटकेलवणनपुढेलिहिलेनाही
मितिमाघशुध्द१२गुरुवारनक्षत्रहस्तेक१७८पराभवसंवत्सरेसूर्योदयात्गतघटी६॥ पुढेअन्यपत्रावरलेखनं

इतिमंदाग्निचिकित्सा॥ हरीतकीहरहरतुल्यषड्गुणाचतुर्गुणाचतुरविलासपिप्पली॥ द्विचित्रकंवरदंतथैकसैंधवं
रसायनंकुरुतेपक्तिदीपनं॥ इतिहरीतक्यादिचूर्णं॥ हिंगुपिप्पलिसनागरंवचादिप्यकाग्निकहरीतकीगुदः॥
भागद्वयंविनियोज्यचूर्णितंक्षास्योगलवणात्रयेयुतं॥ पीतमात्रसुरयाचकाजिकंमंसुनोल्लसलिलेनवापुनः॥
प्लीहशूलंगुदजातबंधकंहंतिदीपयतिवह्निमोदरं॥ इत्यग्निमुखचूर्णं॥ क्षारोद्वौलवणानिचित्रमभयापा
ठाकरंजबीजसूक्ष्मैलाहपुषाशेलुपुष्करवचादेवदारुजीरद्वयं॥ धात्रीपत्रकंतिंतिडीकहपुषाशृंगीबलादारुच॥
ऐंद्रारुधानागरलवणरसाश्यामायवानीसमं॥ तस्माच्चिंचापलाशमुष्ककतिलाःस्युःकोलिकास्यचा
क्षाराणांसमलोहकिट्टमसमंसूत्रेणनिर्वापितं॥ एवंतानिसमानिसूक्ष्मकरणाच्चूर्णंपुनर्भावयेत्॥ गोमू
त्रेणदिनत्रयंतदनुवास्यान्मातुलिंगैरसैः॥ भावंतंपुनरेवलोचनदिनान्यार्द्रस्यनीरेणवासर्वंगुणोल्लवणसू
चकरंबेऽपरमात्रकं॥ भक्षेद्विगुणंसमंप्रथमकेग्रासेनयुक्तंहितंमंदाग्निविनिहंतिगुल्मनिचयानोदर्य
राळोनपि॥ इतिहरीतक्यग्निमुखचूर्णं॥ पिप्पलीचित्रकंचैवचव्यंपिप्पलिमूलकं॥ गजकृष्णाजमोदाचक्षारोद्वौ
लवणानिच॥ एतान्यर्द्धपलामात्रान्प्रस्थंचापितुषोदकं॥ प्रस्थमात्रघृतंदेयंप्रस्थंचैवादिकंरसं॥ अंगुला
जरसंप्रस्थंप्रस्थंतुमातुलुंगकं॥ दाधिप्रस्थंद्वयंक्षिप्त्वाद्वौप्रस्थेनवनीतकं॥ पचेन्मृद्वग्निनातावद्घृतं

इतिमंदाग्निचिकित्सा॥ हरीतकीहरहरतुल्यषड्गुणाचतुर्गुणाचतुरविलासपिप्पली॥ द्विचित्रकंवरदन्तथैकसैंधवं
रसायनंकुरुतेपक्तिदीपनं॥ इतिहरीतक्यादिचूर्णं॥ हिंगुपिप्पलिसनागरंवचादिप्यकाग्निकहरीतकीगुदः॥
भागद्वयंविनियोज्यचूर्णितंक्षारस्योगलवणात्रयेयुतं॥ पीतमात्रसुरयाचकांजिकंसलिलेनवापुनः॥
प्लीहशूलंगुदजातबंधकंहंतिदीपयतिवह्निमोदरं॥ इत्यग्निमुखचूर्णं॥ क्षारोद्वौलवणानिचित्रमभयाया
ढाकरंसर्जीसूक्ष्मैलाकृमिशोनुपुष्करवचाहपुषाम्लजीरद्वयं॥ धात्रीपत्रकंतिन्तिडिकहपुषाशृंगीबलाक्षारच॥
ऐंद्रारुधानागरकल्कसाद्र्यामायवानीसमं॥ तस्माच्चिंचुपलाद्मुष्ककतिलाःस्युःकोलिकाक्षस्यचा
क्षाराणांसमलोहकिट्टमसमंसूत्रेणनिर्वापितं॥ एवंतानिसमानिसूक्ष्मकरणाच्चूर्णंपुनर्भावयेत्॥ गोमू
त्रेणदिनत्रयंतदनुवास्यामातुलिंगैरसैः॥ भावंतंपुनरेवलोचनदिनान्याद्र्यस्यनीरेणवासुवंगुणोलकंसूक्ष्मचू
र्णकरंबेडोपदमात्रकं॥ भक्षेद्विगुणंसमंप्रथमकेग्रासेनयुक्तंहितंमंदाग्निंविनिहंतिगुल्मनिचयानोदर्य
राजोनपि॥ इतिबृहदग्निमुखंचूर्णं॥ पिप्पलीचित्रकंचैवचव्यंपिप्पलिमूलकं॥ गजकृष्णाजमोदाचक्षारौद्वौ
